# व्यासश्रीः
# VYĀSASRĪḤ

**(A UGC listed Refereed Research Journal)**
**July-December 2019**

**This Issue is dedicated to the**
**Veteran Sanskrit Scholar**
**Pandit Govinda Chandra Mishra**

**: Chief Editor :**
Dr. Buddheswar Sarangi

**: Associate Editors :**
Dr. Prasanta Kumar Mahala
Dr. Saroj Kumar Padhi
Dr. Jagamohan Acharya
Dr. Bharatbhushan Rath
Dr. Priyabrata Mishra
Dr. Gyanaranjan Panda

*Publisher*
**Padmashree Ramaranjan Mukherjee Chair of**
Maharshi Vyasadev National Research Institute
A Unit of Vyasayanam, Regd. No. 1635-IV-477/04
Vedavyas, Rourkela-4, Odisha
Contact No. : 7003415810, 7044016153
email : vyasasri12@gmail.com





## विषयसूची

| सृष्टिः | स्रष्टा | पृष्ठम् |
|---|---|---|
| SRIMUKAKAVI'S VISUALIZATION OF KAMAKSI OF KANCI IN SRIMUKAPANCASATI | | |
| | Prof. Aruna Ranjan Mishra | 1 |
| भारतीयसंस्कृतौ आतिथ्यम् | | |
| | स्वपनमाझिः | 17 |
| अर्वाचीनसंस्कृतसाहित्ये श्रीनिवासरथस्य अवदानम् | | |
| | ड. शिप्रा राय | 22 |
| संस्कृतहिन्दीसाहित्ययोः संसर्गः | | |
| | डा. प्रियव्रतमिश्रः | 27 |
| सांख्यदर्शनस्यैतिहासिकविवेचनम् | | |
| | मृण्मयमल्लिकः | 34 |
| श्रीमद्भगवद्गीतायाम् उपनिषदामाध्यात्मतत्त्वरहस्यम् | | |
| | सन्तोषकुमारसाहुः | 48 |
| सेन–पालयुगीय–कृषिशिल्पव्यवस्थाः शासनपत्रान्वेषणम् | | |
| | मृन्मयी सामन्त | 56 |
| कर्मयोगस्याभिबृद्धयर्थं श्रीमद्भगवद्गीता | | |
| | ड. श्वेतपद्मा शतपथी | 66 |
| वेदेषु दार्शनिकभावना, एकमध्ययनम् | | |
| | सन्दीपकुमारघोषालः | 70 |
| कालिदासीयरघुवंशमहाकाव्ये वर्तमानप्रेक्षापटे नैतिकमूल्यबोधः | | |
| | सुदीप्तकुमारकरणः | 80 |
| पद्मपुराणे मोक्षस्य अवधारणा | | |
| | तरणीकुमारपण्डा | 86 |
| वेदाध्ययने अधिकारनिर्णयः | | |
| | ड. निरञ्जन मिश्रः | 96 |
| क्त्वाप्रत्ययस्य भिन्नकर्तृकत्वभ्रमः | | |
| | समीरसाहा | 109 |



1

सृष्टिः स्रष्टा पृष्ठम्

मनुस्मृतौ प्रतिपादितवर्णव्यवस्थायाः परिशीलनम्
डा. पूर्णचन्द्र उपाध्यायः 123

वर्तमानकाले उपनिषत्कथानां प्रासङ्गिकता
डा. पुष्कर आनन्दः 134

**Influence of Religious Texts on the Indian Society**
Mrs. Sukanya Senapati 139

संस्कृतभाषासामर्थ्यविकाशाय कथासाहित्यम्
विश्वजित् प्रामाणिकः 145

अद्वैतसिद्धौ तद्व्याख्याने च नव्यन्यायशास्त्रयुक्तिभिः व्यवस्थापितानां कतिपय निष्कर्षाणां विवेचनम्
डा. आर् बालमुरुगः 160

कोषशास्त्रस्य इतिहासः
कृत्तिवासमहापात्रः 170

अधिकारसूत्रस्वरूपे परिभाषावचनानि
ड. गिरिधारिपण्डाः 182

शान्तरसे विषयविरागाख्यो निर्वेदः
प्रतापकुमारो मेहेरः 194

गीतायाम् उपलब्धानां शैक्षिकमूल्यानामनुशीलनम्
हरिदाससूत्रधरः 199


ग्रन्थसमीक्षा


राधावल्लवीयसंस्कृतसाहित्ये पर्यावरणचेतना– डा. मेघा गुप्ता 209

काव्यप्रकाशः– शिउलि वर्मन 211






# ŚRĪ-MŪKA-KAVI'S VISUALIZATION OF KĀMĀKṢĪ OF KĀÑCĪ IN *ŚRĪMŪKAPAÑCAŚATĪ*

**Prof. Aruna Ranjan Mishra**

## I

South India has been a fertile land for *bhakti* and devotional literature through the ages. Tirumoolar (3rd to 5th Century CE), 63 Nayanmars (5th Century CE), Karaikkal Ammaiyar (a woman-saint of 5th Century CE), 12 always (6th to 10 Century CE), Andal and her companions (9th Century CE), ***Arunagirinatha*** (1422-60 CE), Tayumanavar (1705 CE), Vallalar Ramalinga Swami (5.10.1823), ***Sankaracarya*** (8th Century CE), Meppathur Narayana *Bhattatiri* (1560 AD) are some devotional poets of South India who steered the direction of devotional mysticism and literature of India for a long time.

On the other hand, the temples and archeological sites of South India - like Kanchipuram and Mahabalipuram - also exude the tradition of *bhakti* in manifestation. The *Kailasanatha* temple (founded in the beginning of 8th Century CE by Narasimhavarman-II, Pallava) of Kanchipuram was a centre of ***Saivite*** devotion for a long time. There the foundation inscription of the Mahendre - *Svargraha* requires *Uma* and *Siva* to come and stay :

"May *Isa* together with *Uma* graciously take for his permanent dwelling this temple of Mahendresvara!"

(Stanza-3, translated by Hultzsch, E, 1890 : 23)[1]

Similarly there are other *Siva* temples in Kanchipuram like *Ekamresvara* temple. *Kamaksi* Temple is an ancient Hindu

temple dedicated to *Kamaksi*, the ultimate form of the Goddess *Lalita Maha Tripurasundari* in Kanchipuram. Many poets have written their devotional songs for different forms of *Siva* and *Parvati*. In the present endeavour we wish to take one such devotional work entitled *Srimukapancasati* (a work of 500 devotional verses dedicated to the Goddess *Kamaksi* of Kanchipuram by the poet Sri Muka Probably belonging to the 11th Century CE as considered from his style of *Bhagavata Mahapurana*) for our discussion.

**II**

The said work is a cluster of five devotional *satakas* named 1. आर्याशतक, 2. पादारविन्दशतक, 3. स्तुतिशतक, 4. कटाक्षशतक, and 5. मन्दस्मितशतक, each of them containing more than one hundred Sanskrit verses on different features and aspects of the deity along with poet's prayers, spiritual fancies, desires, praises of the deity and love for Her.

It is debatable whether the poet *Sri Mukakavi* was actually muka (mute / dumb) or not. However in many contexts the poet also hints himself to be mute and to have been written down the verses at one stretch through the blessings of *Kamaksi*. In the introduction to his Marathi translation of *Srimukapancasati* (S.M.P.) P.G. Lalye refers to a legend that the poet sang out all the verses in the temple precinct in one night and they were written down by the devotees present near him.[2]

In आर्याशतकम्, the poet says that by just remembering *Kamaksi*, a person who is mute and fallen in the sorrow of fierce calamities becomes endowed with the fame unusual in this world-

मूकोऽपि जटिलदुर्गतिशोकोऽपि स्मरति यः क्षणं भवतीम्।
एको भवति स जन्तुर्लोकोत्तरकीर्त्तिरेव कामाक्षि! (*S.M.P.* 1/57)





The poet more clearly says that Kamaksi makes even his mute devotees the masters of Sanskrit word and meaning-

राकाचन्द्रसमानकान्तिवदना नाकाधिराजस्तुता
मूकानामपि कुर्वती सुरधुनी-नीकाशवाग्वैभवम्।
श्रीकाञ्चिनगरीविहाररसिका शोकापहन्त्री सता-
मेका पुण्यपरम्परा पशुपतेराकारिणी राजते।। (*S.M.P.*, 3/11)

The poet describes himself as afraid on the calamities in this world, depressed in heart and as a mute man. He begs mercy of the Goddess to make himself firm-minded-

भवोत्पत्ते भीते मयि वितर नाते दृढभवन्
मनःशोके मूके हिमगिरिपताके करुणया॥ (*S.M.P.*, 3/54)

He demonstrates that his being mute and yet a Sanskrit poet is not a matter of surprise. This is because, just in the beginning of the falling of the side-glances of the Goddess, a mute becomes Lord *Brahma* (learned singer of the Vedas), an ugly man turns handsome like cuppid and a poor man becomes the king of the heaven-

मूको विरिञ्चति परं पुरुषः कुरूपः।
कन्दर्पति त्रिदशराजति किम्पचानः।
कामाक्षि केवलमुपक्रमकाल एव
लीलातरङ्गितकटाक्षरुचः क्षणं ते॥ (*S.M.P.*, 4/79)

**III**

*Srimuka* has many benedictory verses through out this cluster of five *satakas* which are eloquent of the divine stance, youth and beauty of the Goddess *Kamaksi*. He pays his obeisance to Her who has chosen *Kanci* as her abode, has reached the zenith of her youth, has made the Vedas her dangling ear-ornaments and who is the root of the bliss non-dual-

आदृत-काञ्चीनिलयामाद्यामारूढ-यौवनाटोपाम्।
आगमावतंसकलिकामानन्दाद्वैतकन्दलीं वन्दे॥ (*S.M.P.*, 1/9)

He bows down at the feet of Kamaksi, which are mind-enrapturing and capable of neutralizing the sins of her devotees. Her feet, striding slow, are the shelter of the mind of great sages. They are endowned with beauty and viscocity-exuding reddish glow. Those feet, that the poet worships, are effieicnt in conglomerating poet-hood and beauty and are capable of saving the destitutes-

कवित्वश्री-मिश्रीकरण-निपुणौ रक्षणचणौ
विपन्नानां श्रीमन्नलिनमसृणौ शोणकिरणौ।
मुनीन्द्राणामन्तः करणशरणौ मन्दसरणौ
मनोज्ञौ कामाक्ष्या दुरितहरणौ नौमि चरणौ॥ (*S.M.P.*, 2/73)

The poet prays Her to save him from the predicaments of life. He visualizes her as the credential of the empire of Lord *Siva*, the destroyer of (three) cities, as the oldest deity, who has been friends to the river Kampa (near *Kanci*) and has belittled lotuses with the beauty of her feet. She is the root of poet-hood, the grandeur of the virtuous deeds of Himalaya, the creator of universes and is the valourous flag of the Cupid-

कवित्व-श्रीकन्दः सुकृतपरिपाटी हिमगिरे-
र्विधात्री विश्वेषां विषमशरवीरध्वजपटी।
सखी कम्पानद्याः पदहसित-पाथोज-युगली
पुराणी पायान्नः पुरमथन-साम्राज्यपदवी॥ (S.M.P., 3/46)

Srimuka bows down to the very glance of the Goddess Kamaksi- that has enslaved Lord Sankara, that does good to the devotees, that has bewildered Lord Sankara, that enhances the feeling of compassion and that vouchsafes liberation-

कैवल्यदाय करुणा-रस-किङ्कराय
कामाक्षि कन्दलित-विभ्रमशङ्कराय।





आलोकनाय तव भक्तशिवङ्कराय
मातर्नमोऽस्तु परतन्त्रितशङ्कराय॥ (*S.M.P.* 4/47)

There are also many benedictory verses in the book which stress upon muttering and remembering the names of the Goddess which signify Her power, link and stance-

In *Aryasatakam*, the poet sings-

विद्ये विधातृविषये कात्यायनि कालि कामकोटिकले।
भारति भैरवि भद्रे शाकिनि शाम्भवि शिवे स्तुवे भवतीम्।।
(*S.M.P.*, 1/78)

In *Stutisatakam*, he remembers all her identities-

त्रियम्बककुटुम्बिनीं त्रिपुरसुन्दरीमिन्दिरां
पुलिन्दपतिसुन्दरीं त्रिपुरभैरवीं भारतीम्।
मतङ्गकुलनायिकां महिषमर्दनीं मातृकां
भणन्ति बिबुधोत्तमा विहतिमेव कामाक्षि ते॥ (*S.M.P.*, 3/80)

Elsewhere the poet pays obeisance to the Goddess *Kamaksi* by uttering the names of some mother goddesses-

त्वमेव सति चण्डिका त्वमसि देवि चामुण्डिका
त्वमेव परमातृका त्वमपि योगिनीरूपिणी।
त्वमेव किल शाम्भवी त्वमसि कामकोटी जया
त्वमेव विजया त्वयि त्रिजगदम्ब किं ब्रूमहे॥ (*S.M.P.*, 3/92)

The Goddess is the flow of divine honey stored secretly in the interior of the lotus of Upanisads. With Her picture-like lifted breasts, She is the wave of joy for Lord Siva. Srimuka worships Her-

उररीकृत-काञ्चीपुरीमुपनिषदरविन्दकुहरमधुधाराम्।
उन्नम्रस्तनकलशीमुत्सव-लहरीमुपास्महे शम्भोः॥ (S.M.P., 1/27)

Similarly in another verse also the poet prays Her remembering her other names and forms-

कुण्डलि कुमारि कुटिले चण्डि चराचरसवित्रि चामुण्डे।
गुणिनि गुहारिणि गुह्ये गुरुमूर्त्ते त्वां नमामि कामाक्षि॥ (*S.M.P.*,1/46)

The poet worships Goddess. Kamaksi in his meditation replete with various images of Her. She has set moon on her looks. A streak of cleverness swisses around her face. The movement of her side-glances are quick. Her smile is as bright as the white Kunda flower. She is slightly bent forward on account of the heaviness of her breasts. Her locks look like sending out black-bees because of the bluish hues. She enhances profuse fire of love in Lord *Siva* (the Enemy of Cupid). The poet meditates upon that Kamaksi who is the desire-fulfilling tree for the prayers of the poets-

चन्द्रापीडां चतुरवदनां चञ्चलापाङ्गलीलां
कुन्दस्मेरां कुचभरनतां कुन्तलोद्धूतभृङ्गाम्।
माररातेर्मदनशिखिनं मांसलं दीपयन्तीं
कामाक्षीं तां कविकुलगिरां कल्पवल्लीमुपासे॥ (*S.M.P.*, 3/61)

*Srimuka* wishes that the flower-stalk of the smile of Goddess *Kamaksi*- which, waving with the spray of beams, takes the role of the art of swaying *Camara* before the Lord Cupid- seated on the royal throne in the form of Her lifted breasts in a pose exuding his victory over three worlds- manifest to fulfill our desires-

आरूढस्य समुन्नत-स्तनतटी-साम्राज्य-सिंहासनं
कन्दर्पस्य विभोर्जगत्-त्रय-जय-प्राकट्य-मुद्रानिधेः।
यस्याश्चामरचातुरीं कलयते रश्मिच्छटा चञ्चला
सा मन्दस्मितमञ्जरी भवतु नः कामाय कामाक्षि ते॥ (S.M.P., 5/7)

Poet discovers in mind that on the basis of the beauty of smile of the Goddess, the sound of her waist girdle, artful gait, movement of eye-brows, throwing of side-glances, art of glancing in half closed eyes deeply mesmerize Lord *Siva*.





He pays his obeisance to that smile-

श्रोणीचञ्चल-मेखला-मुखरितं लीलागतं मन्थरं
भ्रूवल्लीचलनं कटाक्षबलनं मन्दाक्षवीक्षाचणम्।
यद्वैदग्ध्य-मुखेन मन्मथरिपुं सन्मोहयन्त्यञ्जसा
श्रीकामाक्षि तव स्मिताय सततं तस्मै नमस्कुर्महे।। (S.M.P., 5/70)

## IV

The poet has highlighted many divine features of the deity which suggests her extra-ordinary power. She is like a wish-fulfilling gem. She is always available to the persons having moral life-style. He wishes to be sprinkled with the flow of the supramental bliss-

चिन्तित-फल-परिपोषण-चिन्तामणिरेव काञ्चिनिलया मे।
चिरतर-सुचरित-सुलभा चित्तं शिशिरयतु चित्सुखधारा॥

(*S.M.P.*, 1/3)

She stills the ocean of briths (of her devotees). She roams (as Kundalini) in the Miladhara. She has made Kanci her abode. And she is the wave of the nectarly wisdom. The poet wishes to meditate upon her characteristics like these-

बाधाकरीं भवाब्धेराधाराद्यम्बुजेषु विचरन्तीम्।
आधारीकृतकाञ्चीं बोधामृतवीचिमेव विमृशामः॥ (*S.M.P.*, 1/41)

Poet discovers her bewildering the whole universe with her opposite features. She is non-different (from *Siva*) in body, yet she is different. She represents the unconscious (*acit prakrti*), yet she is the form of consciousness (without which *Siva* is *Sava*). She is the form of Ego (as *Prakrti* includes *manas*, *buddhi* and *ahamkara*), yet she (as a part of Lord *Siva*) has no ahamta (separate identity)-

अभिदाकृति-भिन्दाकृतिरचिदाकृतिरपि चिदाकृतिर्मातः।
अनहन्ता त्वमहन्ता भ्रमयसि कामाक्षि शाश्वती विश्वम्॥

(*S.M.P.*, 1/47)

Although she experiences periodic streams, she is always existent in the hearts of people devoid of *rajoguna*. Although she is with supreme love (for Lord *Siva*), she is the only shelter of all dispassioned people. She has a slow gait, yet she is not available to men slow in good deeds. In fact because of all these opposites the feet of *Kamaksi* generate the flow of wonder-

रजःसंसर्गेऽपि स्थितमरजसामेव हृदये
परं रक्तत्वेन स्थितमपि विरक्तैकशरणम्।
अलभ्यं मन्दानां दधदपि सदा मन्दगतितां
विधत्ते कामाक्ष्याश्चरणयुगमाश्चर्यलहरीम्॥ (*S.M.P.*, 2/10)

*Srimuka* feels that a beautiful maid comforts him in his heart. She has made the city of *Kanci* her temple. Both of her breasts represents moon and sun in effulgence. And what is more important, her Being is a conglomeration of Bindu (dot-representing the beginning of existence), Akasa (representing the locus of creation) and Nada (representing the Supreme Consciousness in everything)-

नन्दति मम हृदि काचन मन्दिरयन्ती निरन्तरं काञ्चीम्।
इन्दु-रवि-मण्डल-कुचा विन्दु-वियन्नाद-परिणता तरुणी॥

(*S.M.P.*, 1/52)

The poet visualizes the Goddess of Kanci as a deity in whose hands noose (pasa) and hook (ankusa) are held, whose activities are astounding, who is the final conclusion of the Vedic words and who also is the wife of the weilder of trident (Siva)-





ऐक्षिषि पाशाङ्कुशधरहस्तान्तं विस्मयार्हवृत्तान्तम्।
अधिकाञ्चि निगमवाचां सिद्धान्तं शूलपाणिशुद्धान्तम्।। (S.M.P., 1/55)

The deity is visualized as the Goddess who is capable of loosening the grip of Tamas (*nescience*) on her devotees. She is meditated as having the eyes of blue lotuses, fire on her fore-head, as having held splendouring trident, as having enthralled the mind of (Lord *Siva*) the enemy of death, as having compassioned the Cupid and as having dangling tresses of locks and unsteady glances-

शिथिलित-तमोलीलां नीलारविन्दविलोचनां
दहन-विलसत्फालां श्रीकामकोटिमुपास्महे।
करधृतलसत्छूलां कालारिचित्तहरां परां
मनसिज-कृपालीलां लोलालकामलिकेक्षणाम्॥ (*S.M.P.*, 3/39)

The blessing of the Goddess makes rich poetic style of the poets of *Kanci* be little grape wine in taste-

उदञ्चन्ती काञ्चीनगरनिलये त्वत्करुणया।
समृद्धा वाग्धाटी परिहसितमाध्वी कवयताम्। (*S.M.P.*, 3/51)

She has in fact a close connection with the poets. She is the zenith of luck-for poets-which accepts the crowns of Indra (enemy of Jambha-demon) etc. as the foot-rest, freely makes the chains of words conjoined by poets as her pleasure garden and turns the beauty of lightening into roses through the glittering of her jewels, and relaxes in the assembly of poets on the bank of the river *Kampa* (near *Kanci*)-

जम्भारातिप्रभृतिमुकुटीः पादयोः पीठयन्ती
गुम्फान्वाचां कविजनकृतान् स्वैरमारामयन्ती।
शम्पालक्ष्मीं मणिगणरुचा पाटलैः प्रापयन्ती
कम्पातीरे कवपरिषदां जृम्भते भाग्यसोमा॥ (*S.M.P.*, 3/60)

The reason for her being dear to poets is that she is the manifestation of a special knowledge (*vidya*). Accepting the beauty of mountains in her breasts, expressing rivalry to lotuses through her eyes, foiling the style of clouds loitering on the bank of *Kampa* and accepting the grudge of Koka (love) birds on her head, she roams on the same bank as a secret *vidya* (that poets like to perfect)-

ऊरीकुर्वन्नुरसिजतटे चातुरीं भूधराणां
पाथोजानां नयनयुगले पारिपन्थ्यं वितन्वन्।
कम्पातीरे विहरति रुचा मोघयन् मेघशैलीं
कोकद्वेषं शिरसि कलयन् कोऽपि विद्याविशेषः॥ (*S.M.P.*, 3/63)

Therefore, if a *jiva* bows down to her even once, he gets accolades from all around, power and sharp mind in the assembly of poets and pandits, utterances as sweet and fluent as the flow of honey and attraction of the goddess *Lakshmi*- just on a glance of *Kamaksi* for a moment-

जन्तोः सकृत्प्रणमतो जगदीड्यतां च
तेजस्वितां च निशितां च मतिं सभायाम्।
कामाक्षि माक्षिकझरीमिव वैखरीं च
लक्ष्मीं च पक्ष्मलयति क्षणवीक्षणं ते॥ (S.M.P., 4/62)

The beauty of spring season existent in Her sport of glancing at matues the honey-juice (*Kavya-rasa*) whose unimpeded scent is spread everywhere and which is nourished by the (pundits and poets) experienced cuckoos in the mango-grooves in the form of the stanzas of fresh poetry of the talented once-

प्रौढीकरोति विदुषां नवसूक्तिधाटी-
चूताटवीषु बुधकोकिल-लाल्यमानम्।





माध्वीरसं परिमलं च निरर्गलं ते
कामाक्षि वीक्षणविलास-वसन्तलक्ष्मी॥ (S.M.P., 4/89)

Poet further discovers *Kamaksi* as a queer combination of opposites. Though her side-glances are blue, they generate redness (*raga=love*) in *Siva* (the destroyer of three cities); though they are unsteady, still they steady great devotion of people; and though they are curved, still they render simplicity to the people bowing down to her. Poet wishes, 'May the side-glances of *Kamaksi* dance on him'-

नीलोऽपि रागमधिकं जनयन् पुरारे-
र्लोलोऽपि भक्तिमधिकां द्रढयन्नराणाम्।
वक्रोऽपि देवि नमतां समतां वितन्वन्
कामाक्षि नृत्यतु मयि त्वदपाङ्गपातः॥ (*S.M.P.*, 4/16)

Again the girdle-spread of Her quickly moving eyes is ever-exerting in tying the heart of Lord-*Siva* (the enemy of Cupid). But it is strange that the very eye-contact of hers with the devotees engaged in prayer removes all their ties-

कामद्रुहो हृदययन्त्रणा-जंगरूका
कामाक्षि चञ्चलदृगञ्चलमेखला ते।
आश्चर्यमम्ब भजतां झटिति स्वकीय-
सम्पर्क एव विधुनोति समस्तबन्धान्॥ (*S.M.P.*, 4/17)

The poet reflects on another contradictory demeanour in the Goddess. Her side-glances are blue on account of her blue eyes- naturally unsteaedy- on which she regularly paints collyrium. But it is difficult to know how they regularly injest innocence, sinlessness and steadiness in the heart of the devotees-

कामाक्षि कार्ष्ण्यमपि सन्ततमञ्जनं च
बिभ्रन्निसर्गतरलोऽपि भवत्कटाक्षः।
वैमल्यमन्वहमनञ्जनताच भूयः
स्थैर्यं च भक्तहृदयाय कथं ददाति॥ (S.M.P., 4/42)

Another divine contradiction in the Goddess is that her glances house the sprouts of love and desires. May those glances fulfill all desires of her devotees. But it is difficult to know how those glances themselves being smeared with love and desires generate only detachment in the hearts of great sages-

कामाङ्कुरैक-निलयस्तव दृष्टिपातः
कामाक्षि भक्तमनसां प्रददातु कामान्।
रागान्वितः स्वयमपि प्रकटीकरोति
वैराग्यमेव कथमेष महामुनीनाम्॥ (S.M.P., 4/70)

When her just glance is a wish-cow (*kamadhenu*) which is active in vouchsafing the objects of the desirous, how it is then- the poet wonders- that a contact with that glance makes men free from bondage and they immediately forsake their animality-

आकाङ्क्ष्यमाण-फलदान-विचक्षणायाः
कामाक्षि तावककटाक्षक-कामधेनोः।
सम्पर्क एवं कथमम्ब विमुक्तपाश-
बन्धाः स्फुटं तनुभृतः पशुतां त्यजन्ति॥ (*S.M.P.*, 4/76)

The poet sees *Kamaksi* as a great solace to the ignorant people who experience the torment of the go of the world. Her cool glances give them the feeling of moonlight, thick sandal paste, cool string of pearls and of the cool sprinkle of the snow-water-





संसारधर्म-परितापजुषां नराणां
कामाक्षि शीतलतराणि तवेक्षितानि।
चन्द्रातपन्ति घनचन्दनकर्दमन्ति
मुक्तागुणन्ति हिमवारिनिषेचनन्ति॥ (*S.M.P.*, 4/77)

*Srimuka* sees great features in the casting of *Kamaksi*'s side-glance which, he prays, should nourish his whole existence. Because of its intrinsic beauty her side-glance is just a sprout of pride of the sports of the Cupid, a sprout of despise on the demolished skill of the lotuses and a flame of lamps for the multitude of worldly darkness-

दर्पाङ्कुरो मकरकेतन-विभ्रमाणां
निन्दाङ्कुरो विदलितोत्पलचातुरीणाम्।
दीपाङ्कुरा भवतमिस्त्र-कदम्बकानां
कामाक्षि पालयतु मां त्वदपाङ्गपातः॥ (*S.M.P.*, 4/85)

Moon does not do any favour to people except assuaging the heat. But the glowing beams of the smile of the Goddess Kamaksi, removes sorrow, generates revigouration of age, pours in beauty and spreads fame (of her devotees)-

ज्योत्स्ना किं तनुते फलं तनुमतामौष्णय-प्रशान्तिं विना
त्वन्मन्दस्मितरोचिषा तनुमतां कामाक्षि रोचिष्णुना।
सन्तापो विनिवार्यते नववयः प्राचुर्यमङ्कुर्यते
सौन्दर्यं परिपूर्यते जगति सा कीर्त्तिश्च सञ्चार्यते॥

(*S.M.P.*, 5/72)

In this way the poet *Srimuka* visualizes in his creative meditation many aspects, features and characteristics in the divine and beautiful personality of the Goddess *Kamaksi* of *Kanci*. Though less known in the galaxy of devotional poets in

Sanskrit, his poetic talent, devoion to the Mother Goddess and this mediative visualization of the Goddess have no parallels. His seeing the Goddess as कारणपरचिद्रूपा (1/1), कैवल्यानन्दकन्द (1/2), चिन्तित-फल-परिपोषण-चिन्तामणिः (1/3), चित्सुखाधारा (1/3), पञ्चशर-शास्त्र-बोधन-परमाचार्या (1/5, शिथिलित-परमशिव-धैर्यमहिमा (1/8), आनन्दाद्वैतकन्दली (1/9), शृङ्गाराद्वैततन्त्रसिद्धान्त (1/10), अङ्कितशङ्करदेहा (1/15), नित्यतरुणी (1/15), मनसिजसाम्राज्य-गर्वबीजा (1/17), मीनध्वजतन्त्र-परमतात्पर्या (1/19), उपनिषदरविन्द-कुहर-मधुधारा (1/27), लावण्यामृत-तरङ्गमाला (1/38), बोधामृतवीचिः (1/41), निगमवाचां सिद्धान्तः शूलपाणिशुद्धान्तः (1/55), ब्रह्मस्तम्ब-शिल्पकल्पना (1/56), आनन्दपाकभेदा (1/67), श्रुतियुवति-कुन्तली-मणि-मालिका (1/71), तुहिनशैल-बालिका (1/71), पुञ्जित-कविलोक-सूक्तिरसधाटी (1/75), कपालशूलाभिराम-करकमला (1/94), अपवर्गसौधवल्लभी (1/97), चिद्-गगन-कौमुदीधारा (1/100), कवि-कमल-बालार्क-सुषमा (2/4), मदनपरिपन्थिप्रियतमा (2/22), तुहिन-गिरिराज-तनया (2/34), पुरमथनसीमन्तिनी (2/40), मुनिहृदयलीलैकनिपुणा (2/44). विकच-तरुणाम्भोरुहरुचिः (2/47), शशिशकलचूडप्रियतमा (2/47;98), पशुपति-परिवृढ-प्राण-दयिता (2/55), तुहिनशैलेन्द्रतनया (2/101), परमेश्वर-प्रणयिनी (3/3), क्षीर-सहोदर-स्मितरुचि-प्रक्षालिताशान्तरा (3/5), सीमाशून्य-कवित्व-वर्षजननी (3/6), कल्याण-जन्मस्थली (3/10), काचित्कृपा-कन्दली (3/10), चन्द्रावतंसधर्मिणी (3/20), नारीकुलैक-शिखामणिः (3/22), त्रिलोचनसुन्दरी (3/27), नागेश्वरकन्यका (3/32), गोत्रेधरप्रियनन्दिनी (3/33), कालारिचित्तहरा (3/39), शशधर-शिशु-श्लाघ्य-मुकुटी (3/40), कनकगिरि-धनुष्क-महिषी (3/40), हरोत्सङ्ग-श्रीमन्मणिगृह-महादीप-कलिका (3/42), परिहसितनीलोत्पल-रुचिः (3/44), विषमशर-वीर-ध्वजपटी (3/46), पुरमथनसाम्राज्यपदवी (3/46),





त्रिपुर-परिपन्थि-प्रणयनी (3/52), कामान्तकमहिषी (3/54), स्मरमथन-जीवातु-कलिका (3/55), हृदाश्रित-मदनविद्या (3/56), लीलापरवशित-शूलायुधमनाः (3/56), परिणत-परमज्योतिरुदया (3/59), कविकुलगिरां कल्पवल्ली (3/61), कापि कारुण्यसीमा (3/62), मधुर-कविता-चातुरी (3/64), सोमाभरणमहिषी (3/77), त्रियम्बक-कुटुम्बिनी (3/80), मदनशासनप्रेयसी (3/84), पुलिन्द-पति-सुन्दरी (3/80), त्रिपुर-वैरिसीमन्तिनी (3/91), परमातृका (3/92), त्रिजगदाश्रिता (3/93), चराचरबिधायिनी (3/94), चिन्मञ्जरी (3/94), स्वयं-प्रभव-वैखरी-विपिन-वीथिका-लम्बिनी (3/94), कलावती (3/95), महितरूपशोभावती (3/95), चराचर-जगन्मयी (3/96), चिन्मयी (3/96), हरकुटुम्बिनी (3/98), भुवनजननी (3/99), निखिलनिगमवेद्या (3/99), परम-शिव-वधूटी (3/101), एकाम्रनाथ-तरुणी (4/1), कौतुक-तरङ्गितनीलकण्ठा (4/11), तुहिनाद्रिकन्या (4/36), कामेश्वरी (4/48), तुहिनाद्रि-सूता (4/65), नगराजकन्या (4/93), भूधरकन्यका (4/101), एकाम्रनाथप्रिया (5/19,80), गिरिसार्वभौम-तनया (5/26), कुलशैलराज-तनया (5/33), नगराज■ोखर-सुता (5/37), जगदीश्वरप्रणयिनी (5/60), श्रीकाञ्चीपुर-रत्नदीप-कलिका (5/68) and as परमेश्वर-प्रणयिनी (5/74), is poetically indicative of his visualization of the Divine Mother of the universe.

___

**Notes & References :**

1. Quoted by Charlotte Schmid, The Archaeology of Bhakti I, P. 118.
2. Srimukapancasati, p. 6

### Bibliography


1. Francis, Emmanuel & Schmid Charlotte (Eds), The Archaeology of Bhakti, I French Institute, Pondicherry, 2014.
2. Francis, Emmanuel & Schmid Charlotte (Eds), ibid, II, 2016.
3. Lalye, P.G., (Ed. & Tr. Marathi), श्रीमूकपञ्चशती, Pub : Jagadish Prasad Poddar, Mumbai, 2012.
4. Raghavan V. (Ed.) Devotional Poets and Mystics, Part-I, Ministry of Information and Broadcasting, Govt. of India, New Delhi, 1991 (Rep. of 1978 : first ed.).
5. Raghavan, V., ibid., Part-II, 1991 (Rep. of 1978 : first ed.).
6. Swami, Tapasyanada, (Ed. Tr. Eng.) Narayaniyam (by Meppathur Narayana Bhattatiri, Sri Ramakrishna Math, Mylapur, Chennai, 2003.






# भारतीयसंस्कृतौ आतिथ्यम्

**स्वपनमाझिः**

'अतिथिदेवो भव' इति भारतीयसंस्कृतेः अन्यतमः श्रेष्ठ आदर्शः। कः खलु अतिथिः? इति जिज्ञासायामुच्यते—न तिथिः यस्य न इति बहुव्रीहिसमासे अत्-धातोः उणादि-इथिन्-प्रत्यये अतिथि-शब्दो निष्पाद्यते। यः खलु मानवः कस्यचन गृहस्थस्य गृहे अकस्माद् आयाति स एव अतिथिपदवाच्यः। तदुक्तम्—

'यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः।
अकस्माद् गृहमायाति सोऽतिथिः प्रोच्यते बुधैः॥'[१] इति।

अतिथेरिदम् इति विग्रहे अतिथि-शब्दाद् 'अतिथेर्ञ्यः'[२] इति सूत्रेण ञ्य-प्रत्ययेन आतिथ्य-शब्दो निष्पन्नः। आतिथ्यं नाम अतिथिसेवा। अतिथिसेवा नित्यकर्मत्वेन शास्त्रेषु उल्लिखिता।

वेदो हि प्राचीनतमो धर्मग्रन्थः। तस्य अन्तिमो भाग उपनिषद्। तासु कठोपनिषदि बालको नचिकेताः पितृसत्यपालनार्थं यमसदनम् उपेत्य यमराजं नावलोक्य रात्रित्रयं किमपि न खादित्वा तत्र अतिष्ठत्। प्रत्यागतः यमराजः तन्निशम्य अतिथेः अपूजनजनितस्य पापस्य क्षालनार्थं रात्रित्रयस्य अनशनहेतोः वरत्रयं दातुम् ऐच्छत्। तथा चाम्नातम्–

'तिस्रो रात्रीर्यदवात्सीर्गृहे मे-
ऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु
तस्मात् प्रति त्रीन् वरान् वृणीष्व॥'[३] इति।

अथर्ववेदे द्विषष्टिमन्त्रेषु अतिथेः माहात्म्यं समुपवर्णितम्। अतिथेः सम्मानेन यज्ञफलतुल्यं फलं प्राप्यते। तथा चाम्नातम्–

'श्रियं च वा एष संविदं च गृहाणामश्नाति यः पूर्वोऽतिथेः श्नाति'[४] इति। अपि च निगदितम्–

'एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात् पूर्वो नाश्नीयात्'[५] इति।

शतपथब्राह्मणे पञ्चयज्ञेषु अतिथिपूजनं मनुष्ययज्ञरूपेण परिकीर्त्तितम्। अन्नव्यञ्जनजलप्रभृतिभिः अतिथिसेवनं हि अतिथियज्ञं मनुष्ययज्ञं वा कथ्यते। तदुक्तं भाष्यकृता–

'उदकपूरितं पात्रम् उदपात्रम्। उदकपात्रावधि यद् ओदनादिकं दद्यात् स मनुष्ययज्ञ इत्यर्थः'[६] इति।

मनुसंहितायामपि निगद्यते–

'नृयज्ञोऽतिथिपूजनम्'[७] इति।

मनुसंहितायाम् उत्तम-मध्यम-अधम-भेदेन अतिथेः विभाजनं कृत्वा आतिथ्यम् उल्लिखितम्। तदुक्तम्–

'आसनावसथौ शय्यामनुव्रज्यामुपासनाम्।
उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम्॥'[८] इति।

आतिथ्यं हि इष्टकर्मसु अन्यतमत्वं भजते। तदुक्तम् अत्रिसंहितायाम्–

'अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते॥'[९] इति।

यदि कोऽपि मानवः सम्यक्तया आतिथ्यं विदधाति तर्हि तस्य महान् लाभः स्यात्। तदुक्तं मनुसंहितायाम्–

'धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम्।'[१०] इति।

अत एव गृहस्थैः स्वयं न भुक्त्वा विधिपूर्वकम् आदौ अतिथेः भोजनव्यवस्था करणीया। अन्यथा अतिथेः अवमाननाकारणात् गृहस्थस्य सर्वं पुण्यं क्षयं याति। तेन गृहस्थस्य अमङ्गलमेव जायेत। तदुक्तं मनुसंहितायाम्–

'सम्प्राप्ताय त्वतिथये प्रदद्यादासनोदके।
अन्नं चैव यथाशक्ति संस्कृत्य विधिपूर्वकम्॥
शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्॥'[११] इति।





किं बहुना? महाकाव्यादिषु अपि आतिथ्यस्य सुफलं तथा तदकरणे कुफलं च दरीदृश्यते। यथा माघस्य शिशुपालबधमहाकाव्ये वसुदेवसदने विराजमानः संसारमहीरूहस्य वीजस्वरूपः भगवान् श्रीकृष्णः समागतं देवर्षिं नारदम् अर्घ्यादिपूजाया उपकरणैः सम्पूजितवान्। तदुक्तम्–

'तमर्घ्यमर्घ्यादिकयादिपुरुषः सपर्य्यया साधु स पर्य्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः॥'[१२] इति।

सदाचारपालनेन भगवता श्रीकृष्णेनापि तस्य मर्यादा रक्षिता। ब्रह्मज्ञानिनं नारदं सम्पूज्य श्रीकृष्णः परमानन्दं तस्य चाशीर्वादं लेभे। किञ्च, रघुवंशमहाकाव्यस्य प्रथमसर्गे सस्त्रीको दिलीपो यदा कुलगुरोः वशिष्ठस्य आश्रमम् उपनीतवान् तदा अश्रमवासिभिः अभ्यर्च्चितः।[१३] भट्टिकाव्येऽपि तपोवने समागते याज्ञिकैः तथा यायावरैः पुष्पफलैः जगत्पूज्यः दाशरथिः समर्चितः।[१४]

अपरतः कालिदासस्य अभिज्ञाननाटके तपोवनबाला शकुन्तला अथिथेः दुर्वाससः सत्कारं न चकार। तेन तस्यातिथ्याभावाद् सा अभिशप्ता जाता।[१५] अभिशापस्य फलरूपेण भाविनि काले सा दुष्यन्तेन प्रत्याख्याता। वस्तुतः पूज्यपूजाया व्यतिक्रमः भारतीयसंस्कारविरोधी। तदुक्तं कालिदासेन–

'प्रतिवध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः'[१६] इति।

आनन्दपालनीयं विना एतद् अवश्यपालनीयं नैतिकं कर्तव्यम्। ये खलु महानुभवाः ते एतत् पवित्रं कर्तव्यं परिपाल्य तृप्तिं लभन्ते। न केवलम् एतत्, अपि च, पूज्यव्यक्तीनाम् आशीर्वादलाभः अनया सेवया एव लभ्यते। तदुक्तं माघेन–

'ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः'[१७] इति।

अद्यतने कालेऽपि आतिथ्यस्य सेवा कुत्रचित् परिलक्ष्यते कुत्रचिच्च न परिलक्ष्यते। परन्तु सर्वदा सर्वत्र च अतिथिसेवा करणीया, तेन गृहस्थानां मङ्गलमेव समुपजायेत।

परिशेषे एतदेव कथ्यते यत्—भारतीयसंस्कृतौ आतिथ्यं नित्यकर्मत्वेन परिगण्यते। नित्यकर्मणः अकरणे प्रत्यवायो जायते। तदुक्तं वेदान्तसारग्रन्थे–

'नित्यानि अकरणे प्रत्यवायसाधनानि'[१८] इति।

स्मृतौ अपि निगदितम्–

'अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसज्जन् चेन्द्रियार्थेषु नरः पतनमृच्छति॥' इति।

अत एव सम्यग् अतिथिसेवापालनेन परमेश्वरस्य सेवापि विधीयते। अतः साधूक्तम्–

'अतिथिदेवो भव' इति। इति शिवम्।

——





**पादटीका**

१. वङ्गीयशब्दकोशः,
२. पा– ५।४।२६
३. कठोपनिषद्– १.१.९
४. अथर्ववेदः– ९.४.६
५. तत्रैव– ९/८/७
६. शतपथब्राह्मणम्–भाष्यम्
७. मनुसंहिता– ३.७०
८. तत्रैव– ३.१०७
९. अत्रिसंहिता
१०. मनुसंहिता– ३.१०६
११. तत्रैव– ३.९९,१००
१२. शिशुपालबधम्– १/१४
१३. रघुवंशम्– १/५३,५८
१४. भट्टिकाव्यम्– २/२०
१५. अभिज्ञानशाकुन्तलम्– ४/२
१६. रघुवंशम्– १/७९
१७. शिशुपालबधम्– १/१७
१८. वेदान्तसारः, पृ. २७

**सहायकग्रन्थावली**


१. मनुसंहिता, मानवेन्दुवन्द्योपाध्यायः, संस्कृतपुस्तकभाण्डारम्, १४१०
२. कठोपनिषद्, सीतानाथगोस्वामी, संस्कृतपुस्तकभाण्डारम्, २००९
३. शिशुपालवधम् (प्रथमसर्गः), सत्यनारायणचक्रवर्ती, संस्कृतपुस्तकभाण्डारम्, १९९०
४. शिशुपालवधम्, (प्रथमसर्गः), अनिलवसुः, संस्कृतवुकडिपो, २००२
५. बङ्गीयशब्दकोषः (प्रथमखण्डः), हरिचरणवन्द्योपाध्यायः, साहित्यअकाडेमि, नवममुद्रणम्– २०१६
६. अभिज्ञानशकुन्तलम्, अनिलवसुः, संस्कृतवुकडिपो, २००९
७. रघुवंशम्, देवकुमारदासः, संस्कृतपुस्तकभाण्डारम्, १४१२

# अर्वाचीनसंस्कृतसाहित्ये श्रीनिवासरथस्य अवदानम्

ड. शिप्रा राय

श्रीनिवासरथः कार्तिकपूर्णिमायां त्रिस्त्रिंशत् अधिक ऊनविंशतिसहस्त्रतमेवर्षे उडिष्याया पुरीनामकस्थाने जन्मग्रहणमकरोत्। तस्य पितुर्नाम जगन्नाथशास्त्री। स पण्डितः आसीत्। श्रीनिवासस्व पितुःसमीपे व्याकरणस्य साहित्यशास्त्रस्य च अध्ययनं कृतवान्। वाराणसीनगरीस्थ संस्कृतमहाविद्यालयतः आचार्यं काशी-हिन्दु-विश्वविद्यालयतः स्नातकोत्तर उपाधिं च लब्धवान्। स सागरविश्वविद्यालये अध्यापनाकार्ये रतः आसीत्। पुनरेश्च उज्जयिनीनगरे विक्रमविश्वविद्यालये अध्यापनात् अतिरिक्तं कालिदासोत्सवस्य प्रारम्भात् सचिवरूपेण नियुक्त आसीत्। कालिदाससमित्याः अकदम्याश्च स निर्देशकः आसीत्। आकाशवाण्याः रङ्गमञ्चे संस्कृतनाटकस्य निर्देशकरूपेण कार्यं कृतवान्। मध्यप्रदेशसाहित्यपरिषदः उरुभङ्गनाटकस्य हिन्दीनाटयरूपान्तरस्य कृते स राजशेखरपुरष्कारम् अलभत। संस्कृतसेवार्थं स राष्ट्रपतिपुरष्कारं प्राप्तवान्। तेन विरचितम्-

१. तदेव गगनं सैव धरा।

२. बलदेवचरितम्।

ग्रन्थद्वयस्य विवरणं निम्नतया लिखितं भवति-

**तदेव गगनं सैव धरा**-

नवत्यधिक-ऊनविंशतिसहस्त्रोतमेवर्षे दिल्लीस्थितराष्ट्रीय-संस्कृतसंस्थानेन इदं पुस्तकं प्रकाशितमभवत्। १९९९ ख्रीष्टाब्दे इदं पुस्तकं साहित्यएकाडेमीपुरस्कारेण विभूषितमभवत्। एकचत्वारिंशत् पद्यानां संकलनम् इदं पुस्तकम्। समाजे नराणां परिवर्तनयुक्तस्वभावम्,





सदाचारविमुखताम्, नेतृणां स्वार्थपरताम्, युवकानां मनसि परिव्याप्तहताशा भावञ्च। अस्मिन् ग्रन्थे प्रणेता उपस्थापितवान्। भारतीयसंस्कृतेः वर्णनम् अस्मिन् ग्रन्थे प्राप्यते। भारतजननी, भारतमातां इत्यादिपद्यानां मध्ये कवि भारतमातुः सेवाकरणाय इच्छति। काव्यस्य विषयवस्तुनः वैचित्र्यं परिलक्ष्यते। अस्य काव्यस्य 'उज्जयिनी जयते' नामककवितायां उज्जयिनीवर्णनं दृश्यते। 'सिप्रा सर्वहिता' नामक-कवितायां उज्जयिनीस्थितमहाकालपरिसरे प्रवाहितायाः सिप्रानद्याः वर्णनं प्राप्यते-

'निखिलभुवन-सन्तापहारिणी
महाकाल-परिसर-विहारिणी।
जयति सदाशिव-सेवानिरता।
दिव्यामृत-सहिता
सिप्रा सर्वहिता॥
अवन्तिजनपद-लोकजीवनं
सिञ्चति सिप्रा भुवि चिरन्तनम्॥'[१]

'रक्ष तद् भारतम्' नामक कवितायां सम्यक्भावेन भारतस्य चित्रं अङ्कितवान् कविः-

'वेदवाग्भासुरा यत्र विश्वम्भरा
ऋग्यजुः सामकाथर्वसंवर्धिता।
विश्वभाषासु या सर्वसम्मानिता
देववाणी शुभा यत्र वाक्संस्कृता॥
यत्र वाल्मीकिना कौञ्चशोकाश्रुणा
लोकवृत्ताद्भुतं काव्यमुद्भासितम्।
व्याससम्पादितं यत्र गीतामृतं
रक्ष सर्वात्मना रक्ष तद् भारतम्॥'[२]

पुनः पुनः कविः प्रार्थितवान् भारतस्य रक्षणार्थम्। यस्मिन् भारते ऋग्-यजुः-साम-अथर्ववेदा रचिताः अभवत्। यत्र संस्कृतभाषा देववाणीरूपेण सम्मानिता, यत्र क्रोञ्चशोकेन प्रभावितो भूत्वा वाल्मीकि

रामायणं रचितवान्। यत्र हिमालयः, मन्दाकिनी, विन्ध्यपर्वतः, नर्मदा, कृष्णा, भागीरथी, गोदावरी इत्यादयः नद्यः प्रवहन्ति तस्य भारतवर्षस्य रक्षणार्थं कविः उक्तवान्। 'जयति संस्कृतभारती' नामक कवितायां कविः संस्कृतभाषायाः जयं घोषितवान्–

'पूर्व-पश्चिम-दक्षिणोत्तरदिग्वलय-लीलावती
भारतीयविभिन्नवाङ्मय-तत्त्वसार-सरस्वती।
जयति संस्कृतभारती।'[३]

जीवनेऽधुनातने, किं मधुना, विज्ञाननौका, पाहि मुकुन्द इत्यादि कवितासु कविः वर्णितवान् साम्प्रतिकजीवनस्य विपर्य्ययम्, पुरुषार्थविपर्य्ययम्, साधारणजनानां स्वभावञ्च गीतिकाव्यानां कविः साम्प्रतिके जीवने परिदृश्यमानं जीवनचर्यायाः चित्रम्, नेतृणां स्वार्थपरता इत्यादि वर्णितवान्। 'विज्ञाननौका' नामककवितायां कविः उक्तवान्– संस्कृते उपवने अधुना दूर्वावृक्षस्य शोभा न भवति उपरन्तु सर्वे जनाः अधुनातनकाले गृहस्य अङ्गने क्याकटासनामकं गुल्मं रोपयन्ति। मानवसभ्यता वर्तमाने सङ्कटापन्ना।

'संस्कृतोद्यानदूर्वा दरिद्रीकृता
निष्कुदेषु स्वयं कन्टकिन्याहिता।
पुष्पितानां लतानां न रक्षा कृता
विस्तृता वाटिकायोजना निर्मिता।'[४]

'तदेव गगनं सैव धरा' नामककाव्यसंग्रहे संस्कृत-गीत-रचनायाः इदानीन्तनभावबोधस्य पारस्परिकाभिव्यक्तेः अनुपमं चित्रं परिदृश्यते। राष्ट्रियएकता, देशभक्तिः, नवजागरणम्, आधुनिकजीवनस्य बहवः वर्णनञ्च अस्मिन् काव्ये दृश्यते। 'विपत्रिता जीवनलतिका' नामक कवितायां नवीनतारहस्यात्मकानुभूतेः प्रकाशः दृश्यते। आधुनिकयुगस्य वैज्ञानिकोन्नतेः मध्ये मानविकमूल्यबोधम्, नैतिकगुरुत्वस्य अवक्षयस्य च चित्रं कविः दृष्टवान्। समाजस्य सामाजिक-सांस्कृतिक-क्रीडाङ्गणात् दूषणं दूरीकर्त्तुं कविः गीतिकाव्ये प्रयतितवान्। अस्य ग्रन्थस्य भूमिकायां कमलेशदत्तत्रिपाठीमहोदयः उक्तवान्–





'श्रीनिवासरथेन न केवलं नवं काव्यवस्तु समाकलितमपितु काव्यानुकूललयविधानेऽपि नव नव प्रयोगः आविष्कृतः। अत्र गीतिषु नियोजितं लयविधानं श्रीमच्छङ्कराचार्याणां स्तोत्रेषु, श्रीजयदेवस्य ललितपदावलीषु श्रूयमाणेन लयविधानेन तुलनामर्हति।'[६]

'बलदेवचरितं' नामकं महाकाव्यं दूर्वानामकपत्रिकायां पञ्चमसर्गपर्यन्तं प्रकाशितमभवत्। आचार्यबलदेवउपाध्यायस्य शिष्यः कविः स्वकीयगुरोः आचार्यबलदेवोपाध्यायस्य चरितम् आश्रित्य इदं महाकाव्यं रचितवान्। महाकाव्यस्य सर्गस्य नाम्नः कतावस्तुनः संकेतः परिस्फुटो भवति। तद् यथा–

श्रीबलदेवावतारः
कर्जनविजृंम्भितम्
वाराणसी निवर्तनम्
मन्त्रदृष्टिः
वर्षाविलासः॥

काव्यस्य प्रारम्भे कविः गणेशस्य वन्दनां कृतवान्। इदं महाकाव्यं सहृदयहृदयमनोग्राहिरूपेण परिगण्यते।

कविः सप्तानवनवैकतमे ख्रीष्टाब्दे व्याङ्गालोरेस्थित दशमविश्वसंस्कृतसम्मेलने संस्कृतकविसम्मेलनस्य अध्यक्षः आसीत्। चतुर्दशाधिकद्विसहस्रतमस्य वर्षस्य जुनमासस्य त्रयोदशदिनाङ्के उज्जयिनीनगरे तस्य जीवनावसानम् अभवत्।

श्रीनिवासरथमहोदयस्य रचनां पठित्वा सहृदयहृदयमध्ये प्रसन्नता अनुभूयते। तस्य रचनायां कवेः मनोरमं चित्रणं कवित्वशक्तिं च परिचायति। नव्यकाव्यशैलीं प्रस्तुतं कृत्वां कविः स्वकीयप्रतिभायाः परिचयं प्रकटीकृतवान्। साम्प्रतिककालस्य बहूनि घटनानि स उपस्थापितवान् तस्य काव्ये। अतएव साम्प्रतिकसंस्कृतकाव्यजगति श्रीनिवासरथमहोदयस्य उल्लेखयोग्यम् अवदानम् अस्ति।

——

**पादटीका**

१. सिप्रा सर्वहिता, तदेव गगनं सैवधरा, पृ. १५
२. रक्ष तद् भारतम्, तदेव गगनं सैव धरा, पृ. १९
३. जयति संस्कृतभारती, तदेव गगनं सैव धरा, पृ. ३१
४. आधुनिके जीवने, तदेव गगनं सैव धरा, पृ. ८५
५. विज्ञाननौका, तदेव गगनं सैव धरा, पृ. ११९
६. तदेव गगनं सैवधरा, पृ. १०

**सहायकग्रन्थावली**

१. तदेव गगनं सैव धरा, कविः श्रीनिवासरथ, राष्ट्रीयसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः, नव देहली, द्वितीयसंस्करण- १००५
२. Sanskrit Writings in Independent India (Compilation of Seminar papers) Editing by V. N. Jha, Sahitya Akademy, First edition, 2003.
३. Modern Sanskrit literature tradition and innovations, Edited S. B. Raghunathacharya, Sahitya Akademi, New Delhi, 2002.





# संस्कृतहिन्दीसाहित्ययोः संसर्गः

**डा. प्रियव्रतमिश्रः**

न खलु तिरोहितमेतद्भाषातत्त्वविदां विदुषां यत् संस्कृतं हि सर्वासां भाषाणां मूलस्रोतो विद्यत इति। सकलापि भाषा संस्कृतानुप्राणिता संस्कृतमूला संस्कृतनिष्ठा वेत्यत्र नासत्यवादविभीषिका। यदि भाषाः त्रिषु भागेषु विभज्यन्ते तर्हि सर्वादौ संस्कृतभाषा भवति, या च भाषा वैदिककालात् समारब्धा, यया च सकलमपि वाङ्मयं दरीदृश्यते। ततः बौद्धकाले जैनकाले प्राकृतभाषा अपभ्रंशभाषाः प्रचलिताः, यया च बौद्धसाहित्यं जैनसाहित्यं भृशं प्रफुल्लितं दृश्यते। ततः प्राकृतभाषातः क्रमशः प्रान्तीयभाषा हिन्दी-गुजराती-ओडिआ-मराठी इत्यादयः प्रादुर्भूताः, याश्च भाषाः तत्तत्प्रान्तेषु व्यवह्रियन्ते। क्रमशः तत्तत्प्रान्तीयभाषाभिः साहित्यं संरचितम्। सर्वासु च प्रान्तीयभाषासु संस्कृतस्य प्रभावस्तु दृश्यत एवेत्यत्र नास्ति शङ्कापङ्कालेपः।

क्रमेऽस्मिन् हिन्दीसाहित्यस्योपरि संस्कृतसाहित्यस्य प्रभावोऽपि सर्वविदितमेव। विशेषतो मध्यकालिकं हिन्दीसाहित्यम् आधुनिकञ्च हिन्दीसाहित्यं संस्कृतसाहित्येन सह संश्लिष्टं वर्त्तते विषयदृष्ट्या, वर्णनदृष्ट्या, रसरीत्यलङ्कारदृष्ट्या च।[१] यद्यपि निर्गुणसुफीकाव्यानि न तथा संस्कृतानुप्राणितानि तथापि सगुणभक्तिकाव्यानि तु नूनं संस्कृतकाव्यसंश्लिष्टानीत्यत्र न खलु विसंवादः। अस्यां खलु रीतौ रामायणमहाभारतपुराणानां प्रभावो भृशं परिलक्ष्यते। कृष्णतत्त्वं भागवतमहापुराणे, ब्रह्मवैवर्त्तपुराणे, जयदेवविरचितगीतगोविन्दे च बहुशो दृश्यते। तदनुयायिहिन्दीकवयः यथा- सुरदासः (१४७८-१५८३) सुरसागरे, नन्दकविः (१५३३-१५८३) भ्रमरगीते रासपञ्चाध्यायाञ्च उपर्युक्तपुराणानि अनुकृत्य समवर्णयन्। सुरसागरभागवतस्य पद्धतिमनुसृत्य लिखितं यथा-

 ISSN 2320-2025

'मुनि सुनि रसन के रसलेख
दरसन गौरीनन्द को लिखि सबल संवत् पेख॥'[२]

कृष्णलीलायाः मूलविषयस्तु भागवतमहापुराणे गीतगोविन्दे चास्तीति स्वयं कविः निगदति। सुरसागरे सुरदासः बहुधा वदति यत् कृष्णस्य पवित्रकृत्यानि दशावताराश्च यन्मया वर्णिताः तदेतत्सर्वमपि शुकदेवेन भागवते यदुक्तं तदाश्रित्यैवेति। परमेतदपि सत्यं यत् केवलं विषयवस्तु एव। ततः गृहीतं परं चिन्तनस्य कल्पनाशक्तेश्च या पराकाष्ठा दृश्यते सुरदासस्य, तत्तु अविश्वसनीयमेव। एवमेव कृष्णसुदाम्नोः मित्रताविषये भागवते यदुल्लिखितं तत्पुनः हिन्दीकवितासु दृश्यते। यथा- १६ शताब्दौ नरोत्तमदासः सुदामाचरितमरचयत्। एवमेव हलधरदासोऽपि (१५७५-१६७६) सुदामाचरितं व्यरीरचत् हिन्दीभाषया। रामायणस्यापि प्रभावो दृश्यते हिन्दीकाव्येषु। यथा ऐदम्प्राथम्येन तुलसीदासः रामचरितमानसं हिन्दीभाषया विरचय्य गृहे गृहे रामचरितं प्रसारितवान्। तुलसीदासः महान् संस्कृतज्ञ आसीत्। मुक्तकण्ठेन वाङ्मुखे एव वदति, यत्तेन रामचरितं वर्ण्यते तद्रामायणमाश्रित्यैव वर्ण्यते। तद्यथा-

नानापुराणनिगमागमसम्मतं यद् रामायणे निगदितं क्वचिदन्यतोऽपि।
स्वान्तः सुखाय तुलसीरघुनाथगाथा भाषानिबन्धमतिमञ्जुलमातनोति॥[३]

यथा रामायणं सप्तसु काण्डेषु विभक्तम्, रामचरितमानसमपि सप्तकाण्डपरिमितम्। तुलसीदासस्य विनयपत्रिकापि संस्कृतस्तोत्रमूला। यथा स्तुतिकुसुमाञ्जलिः महिम्नस्तोत्रमित्यादिः। तुलसीदासस्य बहुमुखप्रतिभाऽऽसीत्। यतः स संस्कृतज्ञ आसीत्। अतः संस्कृतकाव्येषु पुराणेषु च विषयवस्तु संगृह्य लोकबोधनशैल्या हिन्दीभाषया ब्रजभाषया च समुपस्थापयत्। ततः लोके सुप्रसिद्धः समभवत्। एवमेव केशवदासविरचिता रामचन्द्रचन्द्रिकाऽपि रामायणाश्रितैव।[४] हिन्दीसाहित्यस्य रीतिकाव्यान्यपि संस्कृतकाव्याश्रितानि। संस्कृतकाव्यानां लक्षणं रीतिः शैल्यपि हिन्दीकाव्येषु दृश्यते। केशवदासः हिन्दीसाहित्यस्य



 ISSN 2320-2025

प्रथमकविः यो भानुदत्तस्य रसतरङ्गिणीं भोजराजस्य च सरस्वतीकण्ठाभरणमाश्रित्य **'रसिकप्रिया'** इति काव्यं व्यरीरचत् १५९१ शतके।[५] दण्डिनः काव्यादर्शञ्चाश्रित्य **कविप्रिय** (१६०१) इति ग्रन्थं लिलेख। एवमेव अन्येऽपि हिन्दीकाव्यलक्षणग्रन्थाः यथा- चिन्तामणिविरचितः **कविकल्पतरुः**, कुलपतिमिश्रविरचितं **रसरहस्यम्**, देवविरचितं **शब्दरसायनम्**, भिखारिदासविरचितः **काव्यनिर्णयः** इत्यादयः ग्रन्थाः मम्मटस्य **काव्यप्रकाशं** विश्वनाथस्य च **साहित्यदर्पण**माश्रित्य वर्त्तन्ते।[६] हिन्दीसाहित्यस्य रसविषयकग्रन्थान् यदि आलोचयामस्तर्हि तत्रापि दृश्यते संस्कृतग्रन्थानां प्रभावः। यथा- मुरलीधरस्य (१९६६) **छन्दोहरप्रकाशः** सुखदेवमिश्रस्य **वृत्तिविचारः छन्दसारसंग्रहश्च** भट्टकेदारस्य **वृत्तरत्नाकरमाश्रित्यैव** वर्त्तते।[७]

मध्यकालिकहिन्दीकवीनामेतदेव प्रधानं लक्ष्यमासीत् यत् संस्कृतकाव्यस्थितः विषयाः लोकलोचनगोचरतामानेया इति। तत्र या कला स्थापत्यं च वर्णितं दृश्यते, तत्सर्वं साधारणजनता यथा जानीयात्।[७] बिहारीकविरचितः **'सतसाई'** इति ग्रन्थः संस्कृतस्य आर्यासप्तशती अमरूकशतकेत्यादिग्रन्थप्रभावितो दृश्यते। एवमेव भर्तृहरिविरचितशतकत्रयेणापि प्रभावितो दृश्यते सतसाईग्रन्थः। संस्कृतं हिन्दीपद्यकाव्यं गद्यकाव्यञ्च प्रभावयदिति तु निर्विवादम्। रामविषयकाणि यानि काव्यानि हिन्दीभाषया विरचितानि यथा- रामचरित-उपाध्यायविरचितरामचरित **चिन्तामणिः**, मैथिलीशरणगुप्त-विरचितं **साकेतमपि** संस्कृतानुप्राणिनं दृश्यते। प्रथमसर्गस्य प्रथमपद्यमेव व्यनक्ति संस्कृतनिष्ठत्वम्[८]-

अयि दयामयि देवि, सुखदेसारदे
इधर भर निज वरद पाणि पसार दे
दास की यह देह तन्त्री तार दे
रोम तारों में नई झंकार दे॥
बैठ मानस हंस पर कि सनाथ हो

भारवाही कण्ठ केकी साथ हो
चल अयोध्या के लिए सज साज तू
मां मुझे कृतकृत्य कर दे आज तू॥

एवमेव रामानन्दज्यौतिषिविरचितः-रामचन्द्रोदयः, अयोध्यासिंहउपाध्यायविरचित-वैदेहीवनवासः, हरदयालसिंहविरचितः **रावणम्** इत्यादीनि काव्यानि रामायणाश्रितानि।[९] अयोध्यासिंहरचितः **प्रियप्रवासः दैत्यवंशश्च** भागवतेन प्रभावितः। एवमेव कालिदासविरचितमेघदूतेन रघुवंशेन चानुप्राणितः। महाभारतमपि बहूनां हिन्दीकाव्यानां मूलभूतं विद्यते। यथा- रामधारीसिंहदिनकरविरचितानि काव्यानि '**कुरुक्षेत्रम्**', '**रश्मिरथि**', '**ऊर्वशी**' इति काव्यानि। द्वारिकाप्रसादमिश्रविरचितं '**कृष्णायनम्**' आनन्दकुमारविरचितम् '**अङ्गराजम्**' लक्ष्मीनारायणमिश्रविरचितं '**सेनापतिकर्णकाव्यम्**' महाभारतकथावस्तु समाश्रित्य वर्त्तते। जयशङ्करप्रसादः स्व 'कामायानि' इति काव्ये मनुस्मृत्याधारितं समाजं पुराणवर्णितं तात्कालिकसमाजञ्च सम्यक् दक्षतापूर्णं समचित्रयत्। शतपथब्राह्मणस्यापि उद्धरणमेवमवर्णयत्[१०]-

'हिमगिरि के उत्तुङ्ग शिखर पर
वैठे शिला की शीतल ह्लाद।
एक पुरुष भीगे नयनों से
देख रहा है प्रलय प्रवाह॥'

बहुनि हिन्दीनाटकान्यपि संस्कृतकाव्याश्रितानि दृश्यन्ते। यथा- शिवानन्दसहायविरचितं **कृष्णसुदामा** नाटकं देवकीनन्दनत्रिपाठिविरचितं '**रुक्मीणिहरणम्**' बालकृष्णभट्टविरचितं '**दमयन्तीस्वयम्बरनाटकम्**' एवञ्च अयोध्यासिंह-उपाध्यायविरचितं '**प्रद्युम्नविजयम्**' पुराणं महाभारतञ्चाश्रित्य वर्त्तते। भारतेन्दुहरिश्चन्द्रेण रचितानि प्रायशः नाटकानि संस्कृताश्रितानि यथा- १८६८ संवत्सरे रचितं नाटकं '**विद्यासुन्दरम्**' इति संस्कृतस्य '**चौरपञ्चाशिका**' इत्यस्यानुवाद एव।





११ '**रत्नावली**' इति तु साक्षात् नाम्नापि अनुदितः। १८७२ संवत्सरे रचितं '**पाखण्डविजय**' संस्कृतस्य प्रबोधचन्द्रोदयस्यानुवादः। एवमेव **कर्पूरमञ्जरी, मुद्राराक्षस** इत्यादीनि नाटकानि संस्कृतात्साक्षादनुदितानि। मोहनराकेशस्य नाटकं '**आषाढ का एक दिन**' महाकविकालिदासस्य जीवनेन साहित्येन च प्रभावितं दृश्यते। १९६३ संवत्सरे रचितं '**लहरों का राजहंस**' इति नाटकम्, अश्वघोषस्य '**सौन्दरानन्देन**' अनुप्राणितम्।[१२] लक्ष्मीनारायणलालमहोदयस्य नाटकं '**सूर्यमुख**' महाभारतयुद्धात्परं द्वारकानगर्याः वातावरणाधारितम्। धर्मवीरभारतीमहोदयस्य नाटकम् '**अन्धायुग**' महाभारतस्य अष्टादशदिनात्मकस्य सायंकालादारभ्य कृष्णदेहावसानपर्यन्तं वर्णितं दृश्यते। '**जब कोई मनुष्य अनासवन्त होकर चुनौती देता है। इतिहास को उस दिन नक्षत्रों की दिशा बदल जाती नियति नही है। पूर्व निर्धारित उस को हर क्षण मानव निर्णय बनाता मिटाता है।**'[१३] मैथिलीशरणगुप्तेनापि बहूनि संस्कृतनाटकानि यथावत् हिन्दीभाषयाऽऽनुदितानि। यथा- स्वप्रवासवदत्ता, प्रतिमानाटकम्, अभिषेकनाटकम्, अविमारकमित्यादीनि।

साहित्यप्रकारेषु नाटकं श्रेष्ठमिति मन्यते। काव्येषु नाटकं रम्यमिति प्रसिद्धिरस्य। कवित्वस्य अन्तिमसीमा नाटकमिति। उक्तञ्च-नाटकान्तं कवित्वम् इति। वामनः काव्यालङ्कारे वदति—सन्दर्भेषु दशरूपकं श्रेयः इति। यतो हि श्रव्यकाव्यापेक्षया दृश्यकाव्यं प्रभावि भवति। जगति जनानां रुचिर्विभिन्ना, परं नाटके सर्वमपि तत्त्वमुपलभ्यते। उक्तञ्च कालिदासेन-

नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।[१४]

नाटके रसोद्भावनं प्रकृष्टतया भवति इति एवमेव वस्तुरसनायकानां लक्षणमत्र दृश्यते-

प्रकृतित्वादथान्येषां भूयो रसपरिग्रहात्।
सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥[१५]

नाटके पञ्चाङ्कादारभ्य दशाङ्कं यावद्भवति। एवं नाटकविषये बहु वर्णितमस्ति नाट्यशास्त्रे। तान् सर्वांश्च नियमान् पालयति हिन्दीनाटकपरम्परा।

नाटकस्य केचन नियमा भवन्ति, यदाश्रित्य नाटकं विरच्यते मञ्चनं च क्रियते। तदर्थं संस्कृते भरतमुनिप्रणीतं नाट्यशास्त्रं स्तम्भभूतम्। तत्र च नाटकस्य सर्वाः कला वर्णिताः। नाटकं पञ्चमो वेद इत्यप्युच्यते। नान्दी, प्रस्तावना, भरतवाक्यमित्यादीनि तत्त्वानि नाटकस्य मुख्याङ्गानि भवन्ति। एतत्सर्वमपि सैद्धान्तिकतत्त्वं नाट्यशास्त्रे दरीदृश्यते। एतदाश्रित्य हिन्दीभाषयापि सैद्धान्तिकग्रन्था विरचिताः। यथा– महावीरप्रसादद्विवेदिविरचितं नाट्यशास्त्रम्, श्यामसुन्दरदासविरचितं रूपकरहस्यम् इत्यादिः। एष्वपि हिन्दीग्रन्थेषु नाट्यशास्त्रस्य सैद्धान्तिकविषयाः समुपवर्णिताः।[१६] संस्कृतं हिन्दी-उपन्यासानामपि स्रोतो विद्यते। यथा– हजारीप्रसादद्विवेदीविरचितं **'बाणभट्ट की आत्मकथा'** हर्षचरितं कादम्बरीं चाश्रित्य वर्त्तते।[१७]

अनेनोतत्तु निश्चप्रचं यत् हिन्दीसाहित्यस्य सम्बन्धः बहुधा संस्कृतसाहित्येन सह वर्त्तते विषयवस्तुदृष्ट्या, वर्णनशैलीदृष्ट्या, दार्शनिकचिन्तनदृष्ट्या, काव्यशास्त्रदृष्ट्या च। अतः हिन्दीसंस्कृतयोः सम्बन्धः नैसर्गिकः चेत्यलं वाग्वैभवेन।

——





**सन्दर्भाः**


१. हिन्दी साहित्य का इतिहास (आचार्य रामचन्द्र शुक्ल)
२. सुरसागरे प्रस्तावनायाम्
३. रामचरितमानसे वाङ्मुखे
४. हिन्दी साहित्य पर संस्कृत साहित्य का प्रभाव (शरण सिंह)
५. तत्रैव
६. तत्रैव
७. तत्रैव
८. साकेतमहाकाव्ये प्रथमपद्ये
९. हि.सा.का.इ.
१०. कामायनि काव्ये
११. हि.सा.प.सं.सा.प्र.
१२. तत्रैव
१३. अन्धायुग नाटके
१४. मालविकाग्निमित्रे
१५. दशरूपके (३/१)
१६. हि.सा.प.सं.सा.प्र.
१७. तत्रैव


**परामृष्टाः ग्रन्थाः**


१. हिन्दी साहित्य का इतिहास—आचार्य रामचन्द्र शुक्ल
२. हिन्दी साहित्य पर संस्कृत साहित्य का प्रभाव—शरण सिंह (इलाहबाद-१९५२)
३. रामचरितमानस पर पौराणिक प्रभाव—विजय बहादूर अवस्थी (दिल्ली-१९७४)
५. Encyclopaedia of Indian literature

# सांख्यदर्शनस्यैतिहासिकविवेचनम्

मृण्मयमल्लिकः

सांख्यशास्त्रं भारतीयदर्शनेषु नितान्तं प्राचीनदर्शनम् इति तत्त्वदर्शिभिः भण्यते, एतद्दर्शनीयराद्धान्तः प्राचीनोपनिषत्सु अपि वीजरूपेण सन्निहिताः संदृश्यन्ते। छान्दोग्योपनिषत् त्रिगुरुविषयकं सिद्धान्तं वर्णयन्ती प्राप्यते। इन्द्रियमनोबुद्ध्यादिकानुमुत्तरोत्कृष्ट-तादिविषकं क्रमं कठोपनिषदपि तथैव निरूपयन्ती संलक्ष्यते यथा सांख्यदर्शनं निरूपयति। श्वेताश्वरतरोपनिषदोऽवलोकनेन तु तस्याः सांख्यसिद्धान्तानां निधित्वमेव सिद्ध्यति। श्रीमद्भागवते भगवद्गीतायाञ्च सांख्यसिद्धान्ताः साधुप्रतिपादिताः समवाप्यन्ते। प्रायेण सकलेऽपि प्राचीनतमे वाङ्मये सांख्याभिमततत्त्वानां विद्यमानता यस्य सांख्यदर्शनस्य गरीयस्कतां पुराणतमतां ख्यापयति, तस्य दर्शनस्य रचयिताऽसीत् कपिलो मुनिरितीतिहासो वदति। एव मुनिरुपनिषदो यान् हि सांख्यसिद्धान्तान् असङ्केतयन् तान् शास्त्रीये रूपे परिणनाम। तत्त्वसमासं सांख्यसूत्रञ्च प्रणिनाय सः। एतद् ग्रन्थद्वयमप्यधिकृत्य विद्वत्सु पर्याप्तो मतभेदो दृश्यते। विदुषां बहुलता यद्यपि तत्त्वसमासस्य प्राचीनतमतां कपिलकर्तृताञ्चाभ्युपगच्छति परं न सा सांख्यसूत्रस्य प्राचीनतमतामङ्गीकरोति न च तस्य कपिलकर्तृतामेव। कपिलस्य शिष्य आसुरिर्बभुव। न तत्कृता कृतिः साम्प्रतमुपलभ्यते सिद्धान्तास्तु तदीयाः प्राचीनेषु ग्रन्थेषूपलभ्यन्ते। स्याद्वादमञ्जरीकारस्तत्कृतं श्लोकमेकमुद्धरन् पर्यवलोक्यते। आचार्यः पञ्चशिख आसुरेः शिष्य आसीत्। नास्याप्याचार्यस्य रचनाधुनासाद्यते। तत्कृतानि कानिचन सूत्राणि व्यासकृते योगभाष्ये किञ्च भामतीप्रभृतिग्रन्थेष्ववश्यं दृष्टानि भवन्ति। विपश्चितां मतमिदं यत् पञ्चशिखः षष्टितन्त्रं नाम ग्रन्थं रचयामास। साम्प्रतं हि दर्शनेऽस्मिन् यः प्रामाणिको ग्रन्थोऽधिगम्यते प्राचीनतरः





सोऽस्ति सांख्यकारिकाभिधानो ग्रन्थः। सांख्यकारिकायाः कर्ता श्रीमदीश्वरकृष्णः। ईश्वरकृष्णस्य कृतिरियं सांख्यकारिका सांख्यदर्शनस्य लोकप्रियो ग्रन्थोऽस्ति।

आचार्यः शङ्करोऽपि अस्याः सांख्यकारिकायाः कारिकाः स्वकीये शारीरकभाष्ये निदधौ सांख्यमतोपन्यासप्रयोजनेन। वाचस्पतिमिश्रः सांख्यकारिकां व्याख्यातुं सांख्यतत्त्वकौमुदी, माठर आचार्यो माठरवृत्तिं गौडपादः गौडपादभाष्यं शङ्कराचार्यो जयमङ्गलाम्, नारायणतीर्थश्चन्द्रिकाञ्च लिलिखुः। एतेन ग्रन्थस्यास्य पुरातनतामात्रं न सिद्ध्यत्यपि तु अस्य गरीयस्कत्वमपि प्रमाणितं भवति।

सांख्यशास्त्रे प्रथिता आचार्या सन्तीमे-

१. कपिलः, २. आसुरिः, ३. पञ्चशिखः, ४. पतञ्जलिः, ५. जैगीषष्यः, ६. बार्षगण्यः, ७. विन्ध्यवासी, ८. जनकः, ९. पराशरः, १०. व्यासः, ११. ईश्वरः, १२. कृष्णः। एतास्मिन् विषये इतिहासस्य कथनमिदमपि यत् पञ्चशिखादर्वाक् ईश्वरकृष्णाच्च प्राक् भार्गवोलूकहारीतदेवलप्रभृतयः कतिपयेऽन्ये आचार्या अजनिषत।

सांख्यसिद्धान्तप्रतिपादनपरा 'युक्तिदीपिका' संज्ञिका कृतिरेका अद्यत्व एवोपलब्धा। एषः ग्रन्थः प्राचीनसांख्याचार्यसिद्धान्तैः समुल्लसितोऽस्ति। अत्र वसुवन्धुदिङ्नागमदृशपुरातनबौद्धाचार्याणामपि मतान्युल्लिखितानि सन्ति स्थाने स्थाने। ग्रन्थोऽयमद्भुतः परं कः कर्तास्येति न विदितम्।

षोडशे शतके विज्ञानभिक्षुर्नाम आचार्यः सांख्यशास्त्रस्य महान् विद्वान् व्याख्याता प्रादुर्बभूव। वस्तुतस्त्वाचार्या एषः पुनरपि दर्शनमिदमुज्जीवयाञ्चकार। अयं सांख्यसूत्रे सांख्यप्रवचनभाष्यं नाम प्रकाण्डपाण्डित्यपूर्णं ग्रन्थञ्चकार व्यासभाष्ये च योगवार्तिकं नाम विपश्चित्तल्लजाश्चर्यकरवैदग्ध्यविलसितं ग्रन्थं लिलेख। सांख्यसारे सांख्यस्य किञ्च योगसारे योगस्य सिद्धान्ताश्च समासेन विद्वन्मूर्धन्योऽयं प्रणिबबन्ध।

सांख्यदर्शने 'प्रकृतिपुरुषान्यताख्यातिः' इत्येष सिद्धान्तो निरूपितस्तस्मात् 'सांख्यम्' इत्येतां ख्यातिं भजेत दर्शनमिदम्। प्रकृतिपुरुषान्यताख्यातिरेव 'संख्या' इति प्रोच्यते। संख्यापदस्यार्थोऽस्ति—'सम्यग् ज्ञानम्'। उक्तञ्च शाङ्करविष्णुसहस्रनामभाष्ये—'शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते'। तत्त्वानां संख्याया निर्धारणीकृतत्वादस्य दर्शनस्य नाम 'सांख्यमि'ति प्रथतेस्म इति च विद्वन्मतम्। महाभारते प्रोक्तम्-

'संख्या प्रकुर्वते चैव प्रकृतिञ्च प्रचक्षते।
तत्त्वानि च चतुर्विंशत् तेन सांख्यः प्रकीर्तिताः॥'[१]

**सांख्यतत्त्वविमर्शः**

सांख्यदर्शनं पञ्चविंशतितत्त्वानि मन्यते। तानि सन्तीमानि १. पुरुषः, २. प्रकृतिः, ३. महत्, ४. अहङ्कारः, (५-९) पञ्चतन्मात्राः, (१०-१४) पञ्चभूतानि, (१५-१९) पञ्चकर्मेन्द्रियाणि, (२०-२४) पञ्चज्ञानेन्द्रियाणि, २५. मनः।

आह च सांख्यकारिका-

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥'[२]

एतेषां तत्त्वानां ज्ञानेन मानवः, कामं सः सन्यासी स्याद् ब्रह्मचारी वा गृहस्थः, दुःखेभ्यो मुक्तो भवति। उक्तञ्च सांख्यसंग्रहे-

'पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः।
मुण्डी जटी शिखी वापि मुच्यते नात्र संशयः॥'[३]

एषां तत्त्वानां मध्ये प्रकृतिः सर्वेषामपि कारणमस्ति न सा कस्यापि कार्यमतः सा 'प्रकृतिः' किंवा 'अव्यक्तम्' यद्वा 'प्रधान' मित्युच्यते। कानिचन च तत्त्वानि तु न कस्यापि कारणभूतानि, तानि कार्याण्येव सन्ति। तानि 'विकृतिः' इत्येतेन व्यपदेशेन व्यपदिश्यन्ते। विकृतिभूततत्त्वानि सन्ति षोडश—श्रोत्रघ्राणरसनत्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि,





आकाशपृथिवीतेजोवायुजलाख्यानि पञ्च महाभूतानि मनश्च। कानिचित्तु सन्त्येवंविधानि यानि कानिचन तत्त्वान्युत्पादयन्त्यतः कारणभूतानि भवन्ति कानिचन च प्रति तानि कार्यभूतानि सन्ति-उत्पद्यन्ते हि केषाञ्चन तत्त्वानां सकाशात्; ईदृशानि तत्त्वानि प्रकृतिविकृतिभूतानीति प्रोच्यन्ते। तानि सन्ति सप्त-महत्तत्त्वम्, अहङ्कारः पञ्चतन्मात्राणि (शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रम्) पुरुषाख्यं तत्त्वं न कस्मादपि समुत्पद्यते न चोत्पादयति किमपि। तत् तत्त्वं हि न प्रकृतिर्न च विकृतिः। इदमेव सर्वमुपरिस्थिता कारिका प्रतिपादयति सांख्यकारिकायाः।

सांख्यदर्शनस्य परमव्यापकत्वात् तत्तत्त्वानां विवेचनमनेकधा कृतं भवति दृग्गोचरम्। क्वचिन्मूलप्रकृतिरेकेत्युक्तम्,[४] क्वचिद् आत्मानमात्मानं प्रति प्रकृतिरित्याम्नातम्,[५] क्वचिद् बुद्धिमहञ्च पृथक् पृथगिति निगदितम्,[६] क्वचिदभिहितं तन्महत्पदं बुद्धेः पर्यायवाचिपदम्, क्वचिद् प्रकृतिः स्वतन्त्रसत्ताख्याता पुरुषात् सा भिन्नैव कथिता,[७] क्वचित् सा पुरुषस्य (ईश्वरस्य) शक्तिरिति कथिता। महाभारते शान्तिपर्वणि क्वचित् चतुर्विंशतिः क्वचित् पञ्चविंशतिः क्वचिच्च षड्विंशतिः तत्त्वानि वर्णितानि। गीतायां पराऽपराभेदेन प्रकृतेर्द्वैविध्यं दर्शितम्, तत्रैव च प्रकृतिर्मायेत्युक्तं यदि क्वचित्; तर्हि अन्यत्र सा प्रकृतेर्भिन्नेत्यप्युक्तम्। एतदवलोकनेन स्पष्टमेव साधुतया ज्ञातं जायत इदं यद् विद्यावन्तः सांख्य-तत्त्व-विवेचनेऽतितरां रुचिमग्रहिषुः।

**कार्यकारणसिद्धान्तः**

सांख्यस्य कार्य-कारणविषयकः सिद्धान्तोऽद्भुतः। सांख्यं वदति उत्पत्तेः प्रागपि कार्यं कारणेऽव्यक्ततत्त्वेन निषीदति। न वस्तुतस्तु कार्यकारणयोर्मध्ये भिन्नता। कार्यस्याव्यक्तावस्थैव कारणमित्युच्यते। किञ्च कारणस्य व्यक्तावस्थैव 'कार्य' मित्येनां संज्ञामश्नुते। न तत्र तात्त्विको भेदो व्यवहारवशादेव 'इदं कार्यम्' 'इदं कारणम्', इत्यनेन प्रकारेणाभिधीयते। सांख्यस्यैष सिद्धान्तः 'सत्कार्यवादो' वा

'परिणामवाद' इति कथ्यते। स्वकीयमेतं सिद्धान्तं पोषयितुं युक्तियुक्तामिमां कारिकां सांख्यकारिका निदधाति–

'असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।'

**कार्यकारणसिद्धान्तः**

सांख्यस्य कार्यकारणविषयकः सिद्धान्तोऽद्भुतः। सांख्यं वदति उत्पत्तेः प्रागपि कार्यं कारणेऽव्यक्ततत्त्वेन निषीदति। न वस्तुतस्तु कार्यकारणयोर्मध्ये भिन्नता। कार्यस्याव्यक्तावस्थैव कारणमित्युच्यते। किञ्च कारणस्य व्यक्तावस्थैव 'कार्य' मित्येतां संज्ञामश्नुते। न तत्र तात्त्विको भेदो–

'शक्तस्य शक्यकरणात् कारणभावाञ्च सत्कार्यम्॥'[८]

सांख्यवृद्धाश्च सत्कार्यवादपक्षे प्राहुः–

'सदेव कार्यमुत्पत्तेः पूर्वं कारकरूपकम्।
आविर्भावतिरोभावौ जन्मनाशावुदीरितौ॥'

ते हि दुग्धं सदेव दधिरूपेण परिणमते, तदु दधिकार्यान्तरं दुग्धाद् भिन्नं च न भवतीत्यादिदृष्टान्तोपस्थापनपुरस्सरं नैजं मतमिदं सुदृढतया परिपुष्णन्तः स्वोत्पत्तेः पूर्वं कार्यं नामीदेव, पश्चात् कारणसामग्रीवशादुत्पद्यत इति कार्यकारणयोरन्यत्वं परमार्थतः 'सत्यम्' इत्येतमसत्कार्यवादं नैयायिकानाम् असतः कार्यस्य कारणव्यापारसहस्रैरपि कर्तुमशक्यत्वात्। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं पार्यते। कारणेऽसतः कार्यस्य कार्यसत्तया सह सम्बन्धासम्भवाञ्च। न हि अविद्यमानं शशशृङ्गं कदापि शशे शृङ्गरूपकार्यसत्तां भजते। तथा च कापिलसूत्रम्—'नासदुत्पादो नृशृङ्गवत्।' इति कथयिता 'सर्वे कार्यरूपा भावा अभावकारणकाः कार्यत्वात्, बीजनाशोत्तरोत्पन्नाङ्कुरादिवत्', इत्येतं हि सौगतानां शून्यकारणवादं बीजावयवा एव कुतश्चित् निमित्तात् प्रादुर्भूतक्रिया पूर्वव्यूहं जहति व्यूहान्तरं चापद्यन्ते तस्माद्युहान्तराञ्च अङ्कुरः उत्पद्यते इति बीजावयवस्थैव कारणत्वं नाभावस्येति भणित्वा, 'कारणमेव





कार्यस्वरूपेण भासते' इति कारणस्यैव सत्यत्वं न तु कार्यस्य सत्यत्वम् इत्येतं वेदान्तिनां विवर्तवादञ्च 'असति बाधे प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासम्भवात् कार्यं नामत्मम्' इत्युक्ता निरस्यन्ति।' प्रकृतेः सिद्ध्यर्थं सांख्यकारिका प्राह युक्तिप्रणिधानपूर्वकम्–

'भेदानां परिमाणात् समन्वयाद् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागादु वैश्वरूप्यस्य॥'[९]
'कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च॥'[१०]

सांख्यसूत्रं च 'कार्यदर्शनात् तदुपलब्धेः', 'अव्यक्तं त्रिगुणाल्लिङ्गादि'त्यादि सूत्राणि समुपस्थाप्य तस्याः प्रतिपादनं कुरुते। 'अविद्यादिद्वारेण परम्परया पुरुषस्य जगन्मूलकारणत्वेऽपि अविद्यादौ यत्र कुत्रचिन्नित्ये द्वारे परम्परायाः पर्यवसानं भविष्यति, पुरुषस्य अपरिणामित्वात्, यतो यत्र पर्यवसानं सैव नित्या प्रकृतिः, प्रकृतिरिह मूलकारणस्य संज्ञामात्रमित्याद्यभिधाय विज्ञानभिक्षवः सांख्यप्रवचनभाष्ये प्रकृतिं साधयन्ति।

**गुणाः**

सत्त्वरजस्तमोभेदाद् गुणाः सन्तिः त्रयः। उक्तञ्च–

'सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।''[११]

सत्त्वं सुखरूपं रजो दुःखरूपं तमश्च मोहरूपमस्ति। यस्मिन् सति कुतश्चिद् भयमुत्पद्यते न कस्यामप्यवस्थायां विषादः समुपजायते तत् सत्त्वम्। रजो दुःख्यस्य कारणं रागद्वेषात्मकतत्त्वात्। तमो मोहस्य हेतुर्मोहात्मकत्वात्। सत्त्वस्य प्रकाशकरणम्, रजसः प्रवृत्तिकारणं तमसश्च नियमनं प्रयोजनमस्ति। उक्तञ्च–

'सत्त्वं लघु प्रकाशकमिष्टमुपम्भकं चलं च रजः।
गुरुवरणकमेव तमः प्रदीपवञ्चार्थतो वृत्तिः॥'[१२]

गुणाः वस्तुतो द्रव्याण्येव सन्ति। न च ते गुणास्तेषां संयोगविभागवत्ताद् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। पदार्थत्वादेव हि सत्त्वादयो 'गुणाः' इति प्रोच्यन्ते। न पुरुषरूपराज्ञो भोगापवर्गरूपमर्थं

साधयन्ति। ते सन्तीन्द्रियातीताः। न तद्रूपं कदापीन्द्रियगोचरं जायते। क्षित्यादिकविकृतिरेव दृग्गोचरीभवति। विकृतिस्त्वस्ति नितान्ततुच्छा। उक्तम्-

'गुणानां परमं रूप न दृष्टिपथमृच्छति।
यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्चकम्॥'[१३]

गुणानां साम्यावस्था 'प्रकृतिः' इति नाम्ना गीयते। बौद्धा इव सांख्यशास्त्रिणोऽपि परिणामनित्यतामुररीकुर्वन्ति। प्रकृतिरस्ति नित्यपरिणामशालिनी। जगतः सर्वेऽपि पदार्थाः प्रतिक्षणं परिवर्तन्ते। परं नैष परिणाम ऐकान्तिकः। परिणतायामप्यवस्थायां गुणानां तत्रानुस्यूतत्वात्। प्रकृतिर्यदा गुणानां साम्यादव्यक्तामवस्थां गाहते तदा भवति प्रलयः। यदा च सा गुणानां वैषम्याद् व्यक्तामवस्थां गृह्णाति तदा सृष्टिर्जायते। प्रलयावस्थायामपि प्रकृतिः परिणामवती भवति। भेद इयान् एव यत् प्रलयावस्थाकालिकपरिणामो न स्वभिन्नवस्तून्यत्पाद्यात्मानमेवाभिव्यनक्ति। एषः परिणामः स्वरूपपरिणाम इति कथ्यते। जगदधिकृत्य सांख्यस्य मतमिदं यञ्चितिशक्तिं विहाय समस्तपदार्थाः क्षणे क्षणे परिवर्तन्ते। तत्त्वकौमुदी प्राह—'प्रतिक्षणपरिणामिनो हि सर्व एव भावाः ऋते चितिशक्तेः।'

**पुरुषः**

निर्विकारचेतनपुरुषस्य सद्भावे किं मानमित्यत्र ईश्वरकृष्ण आह-

'संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥'[१४]

अस्ति स पुरुषः त्रिगुणातीतः, विवेकी, विषयी, विशेषः, चेतनः, अप्रसवधर्मी च। चैतन्यं न तस्य गुणोऽपि तु रूपमेव। अस्ति च सः शरीरेन्द्रियमनोबुद्धिभिन्नः। स ज्ञातृरूपेणावतिष्ठते। न भवति स ज्ञानगोरः। न स आनन्दस्वरूपः, आनन्दचैतन्ययोभिन्नत्वात्। तस्मात् न तयोरभिन्नत्वं कदापि। स च पुरुषो द्रष्टास्ति। तदीयज्ञानप्रकाशः शश्चत् सन्तिष्ठते। तस्य (ज्ञानस्य) विषया एव परिवृत्तिमुपयन्ति। न





तस्मिन् (पुरुषे) कापि क्रिया प्रवर्तमाना भवति। अस्ति स निष्क्रियः, सर्वविषयागोचरा रागद्वेषरहितश्च सः। यावन्त्यपि कर्माणि सन्ति सुख-दुःखानि वा तानि सर्वाणि प्रकृतेस्तदीयविकाराणां (शरीरमनोबुद्ध्यादीनाम्) धर्माः सन्ति। शरीरेन्द्रियमनोबुद्धिषु हि आत्मत्वधीः अज्ञानमात्रम्। अस्मादज्ञानादेव पुरुषः कर्मप्रवाहे निपतति। नानाविधानि च दुःखानि भुनक्ति।

आत्मनः (पुरुषस्य) एकत्वे, कश्चित् पुरुषो बद्धः कश्चिन्मुक्तः इति बन्धमोक्षव्यवस्था न सम्भवतीति, प्रतिशरीरमात्मा भिन्नभिन्न एवास्ति। कणाद आह 'व्यवस्थातो नानेति'—'सांख्यसूत्रमपि ब्रुते—'जन्मादिव्यवस्थातः पुरुषबहुत्वम्', सांख्यकारिकापि आमनति-

'जननमरणकरणानां प्रतिनियमाद् अयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाञ्चैव॥'[१५]

पुरुषोऽयं चेतन उत्पत्तिविनाशरहितो न कस्यापि कारणम्। स सर्वथा पद्मपत्रवन्निर्लेप एव। अतः सः अकर्तैव यश्च कर्त्ता भवति स एव भोक्ता भवतीति नियमात् भोक्तृत्वमपि न पुरुषस्य धर्मः। अतः न स भोक्तापि। यत्तु क्वचित् सांख्ये पुरुषस्य भोक्तृत्वमुक्तं तदपि पुरुषे (आत्मनि) बुद्धिनिष्ठभोक्तृत्वमारोप्यैव, सांख्यनये तस्या एव भोक्तृत्वात् पुरुषस्य च परमार्थतोऽभोक्तृत्वात्। पुरुषोऽपरिणामी अत एव सः कूटस्थो नित्यः सर्वव्यापारश्चास्ति। स तु निरीहःसाक्षी एव। स्वभावतः सः कैवल्यसम्पन्नः। अत एव 'मध्यस्थ' इति कथ्यते। उक्तञ्च 'कैवल्यं' माध्यस्थं द्रष्ट्रत्वमकर्तृभावाश्च। तस्मिन् (पुरुषे) बद्धमुक्तव्यवहार औपचारिक एव दुःखसम्बन्धतद्ध्वंस-रूपबन्धमोक्षयोर्बुद्धावेव सत्त्वात्। उक्तञ्च—'बध्यते मुच्यते च नानाश्रया प्रकृतिः' इति। स च पुरुषः स्वरभावतोऽसङ्गः परं बुद्धि-प्रतिबिम्बितत्वात् स भोक्ता ज्ञाता चेति प्रोच्यते।

**सृष्टिः**

प्रकृति-पुरुषसंयोगात् सृष्टिर्भवति, प्रकृतेर्जडत्वात् न तस्या एव

सकाशात् संसारो जायते न च पुरुषस्य निष्क्रियत्वात् तस्मादेव। सृष्टिकृते द्वयोरपि संयोगोऽपेक्ष्यते। चेतनाधिष्ठातृतायामेव जडप्रकृतिः सृष्टि कार्यं कर्तुं शक्नोति। प्रकृतिपुरुषयोः संयोगे कारणं किमित्यन्नाह सांख्यकारिका–

> 'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
> पङ्गबन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥'[१६]

पुरुषस्य सान्निध्यात् जडप्रकृत्यां विकार उत्पद्यते। तदीया प्रथमा विकृतिर्महत्तत्वमित्युच्यते। जगदुत्पत्तौ महत्तत्वं बीजरूपमस्ति। व्यष्ट्यां तत् 'बुद्धि'रित्यभिधीयते। अस्त्यध्यवसायो बुद्धेर्धर्मः। सात्त्विकबुद्धेः सन्ति चत्वारो गुणा इमे—धर्मः, ज्ञानम्, वैराग्यम्, ऐश्वर्यम्। तामसबुद्धेस्तु गुणास्तद् विपरीताः अधर्मः, अज्ञानम्, अवैराग्यम्, अनेश्चर्यम्। महत्तत्वादहङ्कार उद्भवति। गुणविषमत्वाद्हङ्कारस्त्रिविधिः— वैकृतः (सात्त्विकः) तैजसः (राजसः) भूतादिः (तामसः)। तैजसस्य रजोगुणात्मकत्त्वात् तत्र चलनशीलत्वं विद्यते। अत एव तस्यापेक्षोभयविधविकासस्य कृतेऽस्ति। सात्त्विकादहङ्कारान्मनः, राजसआद् दशेन्द्रियाणि तामसाञ्च पञ्चतन्मात्राणि उत्पद्यन्ते। तन्मात्राणि शब्दस्पर्शरूपरसगन्धानामात्यन्तसूक्ष्मरूपाणि सन्ति। सूक्ष्मत्वात् केवलं योगिजनगम्यानि तानि। शब्दतन्मात्रादाकाशः, शब्दतन्मात्रविशिष्ट-स्पर्शतन्मात्राद् वायुः, शब्दस्पर्शविशिष्टरूपतन्मात्रादग्निः, शब्द-स्पर्शरूपविशिष्टरसतन्मात्राज्जलम्, शब्द–स्पर्श–रूपरसविशिष्टगन्धतन्मात्रात् पृथिवी समुत्पद्यते–

> 'प्रकृतेर्महदांस्ततोऽङ्कारस्तस्माद् गणश्च षोडशकः।
> तस्मादपि षोडशकात् पञ्चभ्य पञ्चभुतानि॥'[१७]

एषा हि सृष्टे रचना द्विविधास्ति मानस–भौतिकरचनाभेदेन। मानसरचनायां सृष्टेः सूक्ष्माङ्गानां रचनास्ति भौतिकरचनायां तदीयस्थूलाङ्गनाम्। बुद्धेः कार्याणि, तद्भावनाः वासनाः संस्कारश्च मानसरचनायाः सन्त्यङ्गानि। एषा मानसरचना बुद्धिसर्ग इति कथ्यते। भावसर्ग–लिङ्गसर्गभेदेन सोऽपि बुद्धिसर्गो द्विविधः।





भावना–वासना–संस्काराणामन्यासाञ्च स्वाभाविकवृत्तीनां समावेशो भावसर्गे भवति। लिङ्गमर्गे च बुद्धिमनोऽहङ्कारेन्द्रियशाक्तीनां सन्निविशेऽस्ति। भौतिकरचना 'भूतसर्ग' इति निगद्यते। तत्र पञ्चभूत–तन्मात्राणि च सन्निविशन्ते। भूतसर्गोऽपि द्विविधो देहसर्गो विषयसर्गश्च। प्राणिनां शरीराणि देहसर्गे समाविष्टानि भवन्ति। भोग्याश्च भौतिकपदार्था विषयसर्गेऽन्तर्भवन्ति। अतः प्रकृतिकृतरचनास्वरूपमित्थम्–




**प्रमाणविचारः**

सांख्यशास्त्रं त्रीणि प्रामाणानि मन्यते। तानीमानि—प्रत्यक्ष्यम्, अनुमानम्, शब्दः। अन्यानि प्रमाणानि उपमानादीनि तत् तेष्वेव त्रिषु अन्तर्भावयति।

**प्रतिविम्बवादः**

यदा कोऽपि घटपटादिपदार्थो दृष्टिपथमायाति तदा तस्येन्द्रियेण सह संयोगो भवति। तद् विषयात्, इन्द्रिये प्रभावः पतति मनस्तस्य विश्लेषणं वा संश्लेषणं विदधाति। इन्द्रियमनसोर्व्यापारेण बुद्धिर्भवति प्रभाववती, सा च विषयस्याकारं गृह्णाति। जडत्वात् तस्याः (बुद्धेः) न सा विषयज्ञानं कर्तुं पारयति। परं तत्र (बुद्धौ) सत्त्वगुणस्याधिक्यं भवति तस्मात् तत्र चैतन्यं पौरुषं प्रतिविम्बतं जायते। प्रतिविम्बतत्वान् पुरुषस्य चेतनस्य बुद्धेरचेतनवृत्तिः (घटपटाद्यात्मिक) उद्भासिता भवति। उद्भासं गच्छन्ती सा ज्ञानरूपे परिणमते। यथा निर्मले दर्पणे

दीपकीयप्रकाशस्य प्रतिबिम्बं निपतति। तेन चान्यान्यवस्तूनि भवन्त्यालोकितानि तथैव सात्त्विकबुद्धौ चैतनस्य प्रतिबिम्बं संक्रमते तेन च विषयाणां बोधो भवति वा विषयो प्रकाशमुपयन्ति। एष एव प्रतिबिम्बवादः।

सांख्यदर्शनमतेन ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च-उभयमपि-स्वतः। उक्तञ्च—'प्रमाणाप्रमाणत्वे स्वतं संख्या समाश्रिताः'। सत्कार्यवाददृष्ट्या असत् पदार्थोत्पत्तिरेव न भवति। अतः ज्ञानानन्तरं समुदितयोः प्रामाण्याप्रामाण्ययोस्तु ज्ञानं निसर्गतो वसति विदधाति।

**सदसत्ख्यातिः**

सांख्यदर्शनं मन्यते यद् बुद्धिवृत्त्या वाह्यं जगद्नुभूयते। वाह्यार्थसत्तआपि तस्येष्टा। बुद्धावारोपितपदार्थस्य स्वरूपं चेत् वाह्य जगति विद्यमानस्य पदार्थस्य स्वरूपं संवदति (तदाकार इव तस्याकरोपि यद्यस्ति) तदा सांख्यं तज्ज्ञानं सत्यं मन्यते। तस्मात् स एव अनुभवः सत्यः यो हि भौतिकवाह्यरूपे बुद्धयारोपितपदार्थरूपे च उभयत्राभिन्नमेवाकारं परिगृह्णाति। सांख्यस्य भ्रान्तिविषयिणी कल्पना मनोरमा। शुक्तौ यदा रजतज्ञानं भवति (इदं रजतम् इत्येवंवधिम्) तदा 'इदम्' इत्येतदात्मकं ज्ञानं सत् 'रजतम्' इत्येतदात्मकञ्च ज्ञानमसद् भवति। 'इदम्' इत्येतदात्मकस्य ज्ञानस्याश्रयश्चाक्षुषं प्रत्यक्षामस्ति अतास्तादस्तिसत्। 'रजतम्' इत्येतदात्मकस्य ज्ञानस्याश्रयोऽस्मदिन्द्रियागोचरः, किञ्च तद् ('रजतम्' इत्येतदात्मकं ज्ञानम्) 'नेदं रजतम्' इत्येतदात्मकेन ज्ञानेनोत्तरकाले बाधितमपि भवति। अतस्तद् 'असत्' अस्ति। इत्थं हि भ्रान्ति ज्ञानं सदसदुभयविधपदार्थाश्रितम्। एए वादः सांख्यदर्शने सदसत्ख्यातिवाद इत्येतेन नाम्ना विश्रुतः। सांख्यसूत्रं 'सदसत्ख्यातिर्बाधाबाधात्' इत्यनेन सूत्रेण इमं वादं समुपन्यस्यति।

सांख्यकर्तव्यमीमांसा-





'दृष्टवदानुश्रविकः सः ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥'[१८]

इत्यनेन वचनेन सिद्ध्यतीदं यत् सांख्याचार्याः अहिंसायाः रुचिं श्रद्धाञ्च निदधति। तेषां कर्तव्यशास्त्रास्याधारशिला 'अहिंसा' एवास्ति। तेषां मतेन यमनियमेषु 'अहिंसा' एव मुख्यः सार्वभौमो धर्मः। अहिंसावादित्वात् सांख्यदर्शनं हि भागवतदर्शनमनुगच्छति। तदेव कर्तव्यमस्ति यदाचरणेन न कस्यापि मन उद्विजते व्यथते वा यदाचारेण न कस्यापि पारमार्थिकी हानिः, यदाचरणेन च सर्वेषामपि सर्वविध उदयो भवति सर्वकल्याणकृत् तदेव कर्तव्यं वस्तुतः कर्तव्यमिति कथ्यते। एतादृशं कर्तव्यं तदेव भवितुमर्हति यद् अहिंसामवलम्ब्य सन्तिष्टमानमस्ति। सांख्यस्य कर्तव्यमहिंसापरकमतस्तदभिमतं कर्तव्यमेवाभिनन्दनीयम्।

**अपवर्गः**

अज्ञानाद् दुःखमुत्पद्यते। तद् दुःखमाध्यात्मिकाधिभौतिकाधि-दैविकभेदेन त्रिविधम्। एभ्यस्त्रिविधेभ्योऽपि दुःखेभ्यो मुक्तिर्व्यक्ताव्यक्तज्ञविज्ञानाद् भवति दुःखानामियमात्यन्तिकी निवृत्तिरेव 'अपवर्गः' किंवा 'मुक्ति'रित्युच्यते। पुरुषो यद्यपि स्वभावतोऽसंगो मुक्तश्च परम् अविवेकात् तस्य संयोगः प्रकृत्या सार्द्धं भवति अनेन संयोगेन प्रकृतिजन्यस्य दुःखस्य पुरुषे यत् प्रतिबिम्बं निपतति तदेव हि पुरुषस्य पुरःदुःखभोगत्वेनोपतिष्ठते। अतः संसारस्य मूलकारणमविवेकोऽस्ति। विवेकश्च दुःखनिवृत्तेः साधनं विद्यते। सांख्यसूत्रं वदति—'द्वयोरेकतरस्य वौदासीन्यमपवर्गः' इति। प्रधानपुरुषयोः परस्परवियोग एव अपवर्ग इति भावः। सांख्य ब्रवीति यत् पुरुषस्यापर्गमधिकृत्य योऽपवर्ग उक्तः स प्रतिबिम्बरूपस्य मिथ्या दुःखस्य वियोग एव। पुरुषस्तु वस्तुतो बन्धन-मोक्षरहितः। तद् बन्धनमोक्षानुभवं तु करोति प्रकृतिरेव। विवेकिनि पुरुषे न प्रकृतेः कोऽपि मनागपि प्रभावः पतति। तत्समक्षेतु सा उपस्थितैव न भवति।

सा लज्जावती नारीव ततो निवर्तते—'या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य।' तत्त्वाभ्यासात् पुरुषे कैवल्यमुदेति। तस्यामवस्थायां सः स्वकीये रूपे स्थितो भवति। सः स्वकीयमेव रूपं यथार्थं द्रष्टुमारभते–

'एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्॥'[१९]

एवं विधां दशां पुरुषो जीवन एव लब्धुं शक्नुते अतः मुक्तिर्द्विविधा मता जीवनमुक्तिः विदेहमुक्तिश्च। सांख्यकारिकोभयविधं मुक्तिं निर्देशत्येवम्–

'सम्यज्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः॥
प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥'[२०]

**ईश्वरः**

जगतो रचनार्थं किञ्च कर्मफलप्रदानादिकार्यप्रयोजनेन ईश्वरस्य सत्तायाः स्वीकरणं नापेक्ष्यत इति सांख्यमामनति। न कदापि तस्य सिद्धिस्तर्कैः कर्तुं शक्यते। 'ईश्वरसिद्धेः', 'मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः' इत्यादिसूत्रान्यत एव सांख्यसूत्रमुपस्थापयति। सांख्यतत्त्वकौमुद्याञ्च '...सर्ग...प्रकृत्यैव कृतो नेश्वरेण...', '...न ह्यवाप्तसकलेप्सितस्य भगवतो जगत्सृजतः किमप्यभिलषितम्...' इत्यादि वाक्यान्युपन्यस्य वाचस्पतिमिश्रः सर्गरचनादिनिमित्तेनेश्वरमपेक्षते। इत्थं हि सांख्यदर्शनं नेश्वरापेक्षि। 'ईश्वरो जगत्साक्षी', तत्सन्निधिमात्रेण प्रकृतिजव्यापारे रमत। इत्याद्यभिधाय विज्ञानभिक्षुः सांख्यस्य निरीश्वरतां निराकरोति। याथार्थ्यमेव सांख्यसमं ज्ञानविज्ञानम् अलमतिविस्तरणेति शम्।

—





**अन्त्यटीका**

१. महाभारतम्, २. सांख्यकारिका ३,
३. सांख्यसप्ततिः जयमङ्गलटीका, ४. षड्दर्शनसमुच्चयः,
५. कठोपनिषद्, ६. सांख्यकारिका,
७. श्वेताश्वतरोपनिषद्, ८. सांख्यकारिका ९,
९. तत्रैव १५, १०. तत्रैव १६,
११. मत्स्यपुराणम् ३.१४, १२. सांख्यकारिका १३,
१३. पातञ्जलयोगदर्शनम्–व्यासभाष्यम्, १४. सांख्यकारिका १४,
१५. तत्रैव १८, १६. तत्रैव २१,
१७. तत्रैव २२, १८. तत्रैव २,
१९. तत्रैव ६३, २०. तत्रैव ६७–६८

**सहायकग्रन्थसूची**


१. गौड, श्रीज्वालाप्रसाद, सांख्यकारिका, चौखम्बा प्रकाशन, २००८
२. भट्टाचार्य, श्रीरवीन्द्रनाथ, सारमञ्जरी, रामकृष्णमिशन इन्सटिटियूट् अव कालचार, २००५
३. भर्गानन्द, स्वामी, पातञ्जल योगदर्शन, उद्बोधन कार्यालय, २००४
४. मुनि, आत्मानन्द, श्रीमद्भगवद्गीता, गीता प्रेस, २०१२
५. शर्मा, श्रीराम, उपनिषद्, युग निर्माण योजना, २००५
६. शास्त्री, गजानन, सांख्यप्रवचनभाष्यम्, चौखम्बा प्रकाशन, २०००
७. शुक्ल, श्रीहरिराम, सांख्यतत्त्वकौमुदी, चौखम्बा प्रकाशन, २०११
८. श्रीवास्तव्य, सन्तनारायण, सांख्यकारिका, चौखम्बा प्रकाशन, २०१०

# श्रीमद्भगवद्गीतायाम् उपनिषदामाध्यात्मतत्त्वरहस्यम्

सन्तोषकुमारसाहुः

अध्यात्मज्ञानदृष्ट्या श्रीमद्भगवद्गीता भारतीयसंस्कृति-परम्परा-मानवीयजीवनमूल्यबोधस्य चैकं ज्वलन्तं निदर्शनम्। मनुष्यस्यात्मविषयकसर्वाणि तत्त्वानि गीतायामेव निहितानि। सामाजिकजीवन-आध्यात्मिकनैतिकमार्गेण च परिचालयितुं गीताज्ञानं हि नितरां प्रयोजनम्। श्रीमद्भगवद्गीता महामुनिमहर्षिव्यासदेवप्रणीतस्य महाभारतग्रन्थस्य भीष्मपर्वान्तर्गता भवति। भगवतः श्रीकृष्णस्य मुखनिःसृतावाणी एषा श्रीमद्भगद्गीता सर्वजनादृता भवति। जातिधर्मवर्णादिभिः सर्वविधजनैः श्रीमद्भगवद्गीताध्ययनं कर्तुं शक्यते कुवर्न्ति च। वेदोपनिषदां सकलसारतत्त्वानि ह्येवात्र यथार्थरूपेण सन्निवेषितानि। अतः कथ्यते-

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थोवत्सा सूधिर्भोक्ता दुग्धंगीताऽमृतं महत्॥[1]

पुनश्च महाभारतस्य शान्तिपर्वणि श्रीमद्भगवद्गीतैव कथमनुशासनं प्रेरयति तथैव वर्णितम्-

वेदस्योपनिषद् सत्यं सत्यस्योपनिषत् दमः।
दमस्योपनिषत् मोक्षः एतत्सर्वानुशासनम्॥[2]

मानवीयमूल्यबोधविकाशार्थं बहुकालादेव उपनिषदां कथानां प्रासङ्गीकता विद्यते। समाजस्य सर्वविधकल्याणार्थं तथा व्यक्तिचरित्रनिर्माणार्थामुपनिषदां भूमिका महत्त्वपूर्णा एव। महर्षिव्यासदेवेनोपनिषदां चतुर्षुश्रेणीषु विभज्यते। ऋक्वेदे २१ (एकविंशतिः) उपनिषदः अन्तर्भुक्ताः। यजुर्वेदस्य १०९ अंशानुसारेण





१०९ उपनिषदः। अथर्ववेदानुसारं ५० अंशाधारेण ५० उपनिषदः। पुनश्च सामवेदानुसारं एकसहस्रांशानुसारेण १००० उपनिषदः समादृताः। एवं प्रकारेण ११८० उपनिषदाधारेण व्यासेन स्वभाविकीव्यवस्थानुसारं विभाजनं सम्पादितम्।

मुक्तिकोपनिषद्रित्या बहुसु उपनिषत्सु स्थितासु केवलं दशसंख्यकानामुपनिषदां प्रामुख्यं परिगण्यते। यथा-

ईशकेन कठप्रश्नमुण्डमाण्डुक्य तितिरिः।
ऐतरेयच्छन्दोग्यस्तुवृहदारण्यक-तथा॥[3]

उपनिषदामाध्यात्मतत्त्वं सम्यक् रीत्या श्रीमद्भगवद्गीतायां सम्मुल्लिखितम्। प्रायतः प्रमुखाणामुपनिषदामाद्यमन्त्रंश्लोकं वा ध्यानेन द्रक्षामश्चेत् उपनिषदां तात्त्विकप्रभावः श्रीमद्भगवद्गीतायां दृश्यते। श्रीमद्भगवद्गीतायां सर्वासामुपनिषदां सारभूततत्त्वानां आत्मज्ञानरूपेणैव गभीरचर्च्चा जाता। उपनिषदोऽतिसरससरलशैल्यां तत्त्वं ग्राहयति, तेन तासां महत्त्वं लोकप्रियत्वं चानुदिनमनुवर्धते। तेनाधारेण मानवजीवनशैली अपि सततं संगठितुं गच्छति।

ईशोपनिषदानुसारं कथ्यते। यथा-

ईशावास्यमिदंसर्वं यद्किञ्चित्जगत्या जगत्।
तेन त्यक्तेन भूञ्जिथा मा गृधः कस्यचिद्धनम्॥[4]

संसारेऽस्मिन् सर्वेषां जीवानां पदार्थानां वा नियन्त्रणकर्त्ता ईश्वरः एव भवति। अतः त्यागपूर्वकं ग्रहणं कुर्यात्। अन्यस्य धनं प्रति आसक्तिः न कर्त्तव्या इति। भगवतः विना कोऽपि कस्यापि शक्तेः अधिकारी भवितुं शक्नोति। परमेश्वरस्य व्यवस्थानुसारेण यथा मिलति, तथैव ग्रहणं कुर्य्यात्। यथा गावः दुग्धं प्रदातुं शक्ताः नतु खादितुम्। सा तृणानि खादितुं योग्या। पुनश्च गृहं निर्माणार्थं काष्ठानि प्रस्तराणि मृत्तिकाः आवश्यकाः भवन्ति इति, परन्तु वयं संग्रहं कर्त्तुं शक्नुमः, विविधरूपेण रुपान्तरितं कर्तुं शक्नुमः, न तु सृजयितुम्।

यथा गृहनिर्माणस्य सर्वाणि कार्याणि श्रमिकः करोति, परन्तु गृहस्वामी भवितुं न पारयति प्रार्थयति वा इति। अतः मनुष्यः भगवतः अधिपत्यं स्वीकारं कुर्य्यात्।

तथा गीतायां सप्तामाध्याये-पराअपरा-प्रकृतिविषये सविस्तरेणालोचितम्। पृथिवीजलवायुअग्निआकाशमनबुद्धि-आदयः अष्टविधरुपैः प्रकृतिः विभाजीता भवति। एतेषां प्रकृतिनां भेदकर्त्ता एव अपरा, एवञ्च येन सम्पूर्णजगत्धृता भवति, सा जीवरूपा चेतनप्रकृतिः भवति। अतः कथ्यते-

भूमिरपोऽनलो वायुः खं मनो बुद्धिरेव च।<br>
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥[५]<br>
अपरेयंमितस्त्वन्यें प्रकृतिं बिद्धि मे पराम्।<br>
जीवभूतां महावाहो ययेदं धार्यते जगत्॥[६]

पुनश्च कर्मरहस्यविषये ईशोपनिषदि यथा वर्णितम्, तदनुसारेण कार्यमपि भवति कर्तुमुचितञ्च। यथा शतवर्षाणि जीविष्यति, संसारबन्धनात् विमुक्तश्च भविष्यति च। कर्मानुसारं जीवनस्य सम्बन्धं विद्यते जीवनलक्षं च साधनं भवति। यथा कर्म तथा फलमिति कथ्यते।

कुर्वन्नेव कर्मणि जिजीविषेच्छतं समाः।<br>
एवं त्वयि नान्यथेतोऽस्ति न कर्मलिप्यते नरे॥[७]

तथैव गीतायां भगवता श्रीकृष्णेन कथ्यते यत् कर्मफले स्पृहा न कर्त्तव्या। मामपि न कर्म लिप्तं करोति, एतादृशं मम तत्त्वं यः ज्ञातुं शक्यते सोऽपि कर्मबन्धः न भवति इति। यः जानाति सो विज्ञाता एव भवति।

न मा कर्माणि लिप्यन्ति न मे कर्मफले स्पृहा।<br>
इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥[८]<br>
एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।<br>
कुरु कर्मैव तस्मात्वं पूर्वैः पूर्वत्तरं कृतम्॥[९]

पुनश्च कर्मफलाधिकारविषयकरहस्यं ज्ञानं वर्णयितुं कथ्यते...भो





पार्थ! तव कर्मणि एवाधिकारः। कदापि फलेषु अधिकारः नास्ति। कर्मफलस्य कारणं न भवतु एवं च अकमर्णि सङ्गोपि न भवतु।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।<br>
मा कर्मफल हेतुर्भूमाते सङ्गस्त्वकर्मणि॥[१०]

पुनश्च सामवेदीय कौथुमसंहिताया...**ऋचं साम यजामहे याभ्याम् कर्माणि कृण्वते**।[११] इति मन्त्रः ऋचं साम च यजनीयत्वरूपेण मन्यते। तथैव गीतायांभगवत्ता कथ्यते यः पुरुष कर्मफलस्याश्रयं न नीत्वा कर्त्तुयोग्यं कार्यं कुर्यात्। एतादृशं कार्य यः करोति स एव सन्न्यासी। सः अग्नित्यक्तः पुरुषः न क्रियात्यागी पुरुष एव भवति।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।<br>
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥[१२]

केनोपनिषद् सामवेदस्य तवलकारशाखान्तर्गता अत्यन्तलघुस्वरूपा तथापि परममार्मिकोपनिषदस्ति। अस्यामुपनिषदि प्रथमखण्डे उपास्यब्रह्मणः रहस्यं स्वरूपञ्च वर्णितमस्ति। केनोषितं पतति इत्यादि स्वकीयप्रारम्भिकपदस्याधारोपरि अस्याः उपनिषदः नाम केनेति अस्ति।

अत्र गुरुशिष्यप्रतिप्रश्नवचनरूपेण ब्रह्मविद्याप्रतिपादित। तद्विधिप्रणिपातेन परिप्रश्नेन सेवया इत्यादि श्रुतिस्मृतिनियमात् च कश्चिदब्रह्मनिष्टंगुरुमुपेत्य विधिवत्प्रत्यगात्मविषया ब्रह्मजिज्ञासा कर्त्तव्या। अतः शिष्यः पृच्छति-केन कर्त्ता इष्टमभिप्रेतं सन् मनः स्वविषयं प्रति गच्छति। केन प्राणाः वाचं-श्रोत्रं-चक्षुरादयः प्रेरिताः भवन्ति इति। मनसः लक्षणं तथा आत्मस्वरूपविषये केनोपनिषदि सम्यग् भावेन वर्णितमस्ति।

केन पतति प्रेषितं मनः केन प्राणप्रथमप्रैतियुक्त...इति।[१३]

उत्तरेण गुरुण कथ्यते...यत्-

श्रोत्रस्य श्रोत्रं मनसो मनो यत्<br>
वाचो ह वाचं स उ प्राणस्य प्राणः।<br>
चक्षुषः चक्षुः अतिमुच्यधीराः<br>
प्रेत्यास्माल्लोकादमृता भवन्ति॥[१४]

तदनुसारेण श्रीमद्भागवद्गीतायाः पञ्चदशाध्याये वर्णितं यत् परमात्मा जीवात्मारूपेण श्रोत्र-चक्षु-त्वचा-रसन-घ्राण-मनादिनाश्रयं कृत्वा विषयान् सेवनं करोति उपभूङ्क्ते इति।

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥[१५]

उपासनापूर्वकं इन्द्रियवसगप्रवृत्तिं च सम्बर्द्धनेन उपनिषदः वाक्यानि यथैव उपयुज्यते।

इन्द्रियेभ्यः परा ह्यार्था अर्थेभ्यश्च परं मनः।
मनसस्तु पराबुद्धिर्बुद्धेरात्मा महान्परः॥[१६]

तथैव गीतायां-

मनसः चापलत्त्वं वर्णनं कृत्वा गीतायामर्ज्जुनेन कथ्यते यत्..मनः चञ्चलः भवति, बलपर्वकं बद्धं न शक्यते। यथा वायुं स्वायतं कर्त्तुं काठिन्यम्।

चञ्चलं हि मनः कृष्ण! प्रमाथि बलवत्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥[१७]

कठोपनिषदि वर्णितं यत्-

आत्मानं ग्रथितं बिद्धि शरीरं रथमेव तु
बुद्धि तु सारथि बिद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि ह्यानाहुर्विषयांस्तेषु गोचरान्
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥[१८]

अत्मैव रथी, शरीरं रथः, बुद्धि सारथी, मनः एव रज्जुः एवं चेन्द्रियाणि अश्वाः इति भुत्वा कार्यं साधयति। विद्याविद्ययोरधिकृतो मोक्षगमनाय सांसारगमनाय च तस्य तदुभयगमने साधनो रथः कल्पते। तत्र तमात्मानमृतरूपं संसारिणं रथिनं रथस्वामिनं बिद्धि जानीहि। शरीरं रथमेव तु रथबद्धहयस्थानीयैरिन्द्रियैराकृष्यमाणत्वाच्छरीरस्य! बुद्धि तु अध्यवसायलक्षणां सारथि बिद्धि बुद्धिनेतृप्रधानत्वाच्छरीरस्य सारथिनेतृप्रधान इव रथः। सर्वं हि देहगतं कार्यबुद्धिकर्तव्यमेव प्रायेण।





मनः संकल्पविकल्पादिलक्षणं प्रग्रहं रशनां बिद्धि। मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रवर्तन्ते।[१९]

आत्मनः स्वरूपं वर्णनं कृत्वा श्रीमद्भागवद्गीतायां भगवत्ता श्रीकृष्णेन कथ्यते यत्-

उद्धरेदात्मनात्मानं नात्मनमवसादयेत्।
आत्मैवाह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥[२०]
बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥[२१]

अनेन ज्ञायते यत् योगारुढजनस्य लक्षणमिथमेव भवति। यदा कोऽपि साधकः सर्वसंकल्पं सन्नस्येन्द्रियार्थेषु कर्मसु च नानुसज्जते तदासौ योगारुढः भवति। परन्तु भोगैसक्ताबुद्धिः समाधौ न विधियते। अतः कर्मसु फलेषु च निरासक्तः सनात्मनः आत्मना उद्धारं कुर्यात्। विनाशशीलैः पदार्थैः सह सम्बन्धमास्थाय स्वस्य पत्तनेनात्मनं नावसादयेत्। जीवात्मा स्वस्योद्धारपतनयोः हेतुः। आत्मा आत्मनः मित्रम्। स्वमुर्द्धतुं समर्थः। विपर्यये त शत्रुरेव।

येन जीवात्मना मनसा तथा इन्द्रियैः सह शरीरस्य विजयः भवति, स एव भिन्नं भवति परन्तु पराजयः भवति तर्हि शत्रुः भवति एव।

पुनश्च कठोपनिषदि द्वितीयाध्याये तृतीयाबल्यां जीवसंसारविषयकं रहस्यं प्रतिपादितम्।

ऊर्ध्वमूलोऽवावशाखः एषोऽश्वत्थः सनातनः।
तदेव शुक्रं तद् ब्रह्मा तदेवामृतमुच्यते।
तस्मिन्लोकाश्रिताः सर्वे तदु नात्येति कश्चन।
एतद्वै तत्॥[२२]

तूलावधारणेनैव मूलावधारणं वृक्षस्य क्रियते लोके यथा, एवं संसारकार्यवृक्षावधारणेन तन्मूलस्य ब्रह्मणः स्वरूपवत्धरयिष्ये। ऊर्ध्वमूलं यत् तद्विष्णोः परमं पदमस्येति सोऽयं व्यक्तादिस्थावरान्तः संसारवृक्ष ऊर्ध्वमूलः वृक्षश्च वचनात्।

जन्मजरामरणशोकाधनेकानर्थात्मकः प्रतिक्षणमन्यथा स्वभावोमायामरीच्युदकगर्न्वनगरादिबद्धष्टनष्टस्वरूपत्वादवसाने च वृक्षवदभावात्मकः भवति। यद्यस्य संसारवृक्षस्य मूलं तदेव शुक्रं शुभ्रं ज्योतिष्मत् चैतन्यात्मज्योतिः स्वभावं तदेव ब्रह्म सर्वमहात्वात्। तदेवामृतम् अविनाशस्वभावमुच्यते कथ्यते सत्यत्वात्। वाचारम्मणं विकारो नामधेयमनृतमन्यदतो मर्त्यम्। तदब्रह्म नात्येति नातिवर्तते मृदादिमिव घटादिकार्यं कश्चन कश्चिदपि विकारः। एतद्वै तत्।[23]

तथैव भगवता श्रीकृष्णेन श्रीमद्भागवद्गीतायाः पञ्चदशाध्याये पुरुषोत्तमयोगे संसाररूपकाश्चत्थवृक्षविषये कथ्यते। आदिपुरुषः परमेश्वरः मूलरूपेण एवञ्च ब्रह्मरूपमुख्यशाखारूपेण एनं संसाररूपमश्वत्थवृक्षम् अविनाशी कथ्यते। चतुर्वेदाः यस्य पत्राणि भवन्ति। एतत् वृक्षरहस्यं यः जानाति सः वेदवित् भवति। यथा–

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पत्रानि यस्तवेदं स वेदवित्॥[24]

भगवान् परमेश्वरः सर्वशक्तिमान् अस्य संसारवृक्षस्य कारणम्, अतः स एव मूलः। संसारविस्तारकर्त्ता ब्रह्मा एव शाखास्वरूपा। मायारुपदुःखमयसंसारचिन्तनं परित्यज्य यः अनन्यप्रेम्णा नित्यनिरन्तरं परमेश्वरं चिन्तनं करोति, स एव वेदतात्पर्यं जानाति वेदवित् भवति च। नित्याभ्यासेन हि सिद्धिश्च।

उपनिषदां सारभूता गीता साधूनां चित्तप्रसादिनी सदा पवित्रा गङ्गा इव शोभते। ज्ञान–कर्म–भक्तियोगानां समन्वयं साधयन्ति एषा गीता मानवजीवनयात्रायाः सन्मार्गप्रदर्शिका भवति। गीतायाः अलौकिकं ज्ञानं संस्मृत्य जीवनलक्षं साधयति चेत् परमानन्दं प्राप्स्यति।

——





**अन्त्यटीका**


१. गीता माहात्म्यम्
२. महाभारत/शान्तिपर्वः
३. मुक्ति. उप १/३०
४. ईश. उप १–१
५. श्रीमद्भागवद्गीता ३/४
६. श्री. भ. गीता ७–५
७. १/२
८. गीता. ४/१४
९. तत्रैव ४/१५
१०. तत्रैव २/४३
११. साम. सं ४–८–१०
१२. गीता ६/१२
१३. केन. उप. १/१
१४. तत्रैव १/२
१५. श्रीमद्भागवद्गीता १५/९
१६. कठोपनिषद् १–३–१०
१७. श्रीमद्भागवद्गीता ६/३४
१८. कठोपनिषद् १–३–३
१९. तत्रैव १–३–३
२०. श्रीमद्भागवद्गीता ६/५
२१. तत्रैव ६/६
२२. कठोपनिषद् २/३–१
२३. तत्रैव (शा.भा.) २/३
२४. श्रीमद्भागवद्गीता १५/१

# सेन–पालयुगीय–कृषिशिल्पव्यवस्थाः शासनपत्रान्वेषणम्

**मृन्मयी सामन्त**

**सारसंक्षेपः**

भारतवर्षे बहुजातीनाम् मनुष्याणाम् आगमनेन प्राचीनभारतस्य इतिहासे विभिन्नेषु क्षेत्रेषु परिवर्तनं सञ्जातम्। गुप्तवंशस्य परवर्तिनि काले पाल–सेनयुगस्य आविर्भावः अभवत्। पालवंशस्य प्रतिष्ठातारूपेण गोपालऽ ७५० ख्रीष्टाब्दे राजत्वशासनम् आरब्धवान् इयनुमीयते। पालभूपतीनां राढाञ्चलस्य यदा सामन्तः आसीत् सामन्तसेनः, तदा सेनवंशस्य गुरुत्वं क्रमेण वर्धते स्म। पालयुगात् आरभ्य सेनवंशं यावत् कृषिक्षेतरए भूमिव्यवस्थायाः च भूमिदानप्रथायाः मर्य्यादा समधिका अभवत्। अत्र भूमिछिद्रन्यायः प्रचलित आसीत्। उभयकालस्य बहुविध–ताम्रशासनस्य वर्णनायाम्–पाठक–काकिनी प्रभृतीनां भूमिपरिमापकस्य नामानि यद्यपि ज्ञायन्ते, तथापि तस्मिन् काले विभिन्नमापकैः नलैः भूमिपरिमापः सञ्जातः। नदीवाहितायाम् उर्वरभूमौ शिशुधान्यरोपनम्, शष्यागारः इत्यादीनां व्यवस्था आरब्धाः। बङ्गदेशात् विदेशेषु इक्षुजात–गुडशर्करारप्तानि कृता। अन्यानि कृषिजद्रव्याणि–एलाच–आम्र–ताम्बुल–डालिम्ब प्रभृतीनि, वनजानि–वंश–काष्ठानि, जलजाः–मत्स्यादयः, प्राणिजाः–गो–अश्वहरिणादयश्च आसन्। वस्त्रशिल्पे च कार्पास–रेशम उत्पादं विख्यातम् आसीत्। मृत्शिल्पिवृन्दः तैजसपत्रानां दग्धमृत्फलकानां निर्माणे च सिद्धहस्तः आसीत्। धातुशिल्पे च—लौह–ब्रोञ्ज–स्वर्ण–रौप्यानां व्यवहारः अभवत्। तत्काले तक्षणशिल्पस्य अन्येषां कति गौणशिल्पनामपि परिचय प्राप्यते। विविध शिल्पानुसारेण विभिन्नसम्प्रदाय–श्रेणी–वर्ण–सङ्घाश्च गठिता अभवन्। ग्रामीन–कृषिशिल्पौ पाल–सेनशासकान् अर्थनैतिकदृष्ट्या समृद्धान् अकुरुताम्।





**गुरुत्वपूर्णशब्दनिर्घण्टः**

पाल–सेनयुगः, भू–पतिः गोपालः, सामन्तसेनः, कृषिप्रधानः देशः, भूमिव्यवस्था, राज्ञः दानम्, ताम्रशासनः, भूमि–छिद्र–न्यायः, नव्यसृष्टभूम्यधिकारी, शासनः वा अग्रहारः, भूमिपरिमापकाः, शकटम्; काकिनी; उन्मानम्; हलम्; केदारः, नलम्, आपत्कालीनशस्यागारः धान्यसञ्चयस्थानं वा, इक्षुजाताः रस–गुड–शर्करादयः, शर्करारप्तानि, कृषिज–वनज–जलज–प्राणिजाः द्रव्याणि, वस्त्रशिल्पम्—कार्पास–रेशमादि, मृत्–धातु–तक्षणशिल्पानि, गोष्ठी वा सङ्घः, कुलिकः, राणकशूलपाणिः, वारेन्द्र–शिल्पगोष्ठी–चूडामणिः, अर्थनीतिः।

प्राकृतिकी परिस्थिति च भौगोलिकावस्थानं वर्षस्यास्य भारतस्य इतिहासं प्रभावितम् अकरोत्–इत्यत्र नास्ति कोऽपि सन्देहः। विशिष्ट–सीमारेखया स्वतन्त्रीकृतः अयं देशः आदियुगात् आरभ्य स्वकीयस्य मौलिकतां प्रमाणयितुं समर्थः। विभिन्नेषु युगेषु विभिन्नानां वंशानाम् उत्थानपतनाभ्यां भारतस्य राजनैतिकविषये, अर्थनैतिकविषये, सामाजिकविषये तथा च धर्मक्षेत्रे संस्कृतेः परिवर्तनं संघटितम्। एवंविधे भारतवर्षे नन्द–मौर्य–शुङ्ग–गुप्तप्रभृतीनां जातीनां परं पालसेनयुगस्य प्रकाशः। कालक्रमेण महापराक्रान्तः भू–पतिः गोपालः पालवंशस्य प्रतिष्ठां कृतवान्। यद्यपि पालराजानां प्रामाण्ये अब्द–शब्दस्य व्यवहारः न दृष्टः, तथापि राज्यवर्षात् अनुमीयते यत् पञ्चाशदधिकसप्तशतके पालराजा गोपालः राजत्वस्य प्रारम्भं चकार। ततः परं दीर्घकालं व्याप्य विशिष्टाः पाल–भूपाः आत्मनां कृतित्वं स्थापितवन्तः। ख्रीष्टीये द्विशताधिकसहस्रे अब्दे पालराजस्य समये पालसाम्राज्यस्य अवसानः सञ्जातः।

तस्मिन् समये सेन वंशः खलु दक्षिणभारतस्य कर्णाटदेशे प्रतिवसति स्म। सामन्तसेनः पालवंशीयस्य तृतीयविग्रहपालस्य

(१०४३-७० ख्रीः) सामन्तरूपेण राढेऽञ्चले विशेषं शासनम् आरद्धवान् तस्य च पुत्रं हेमन्तसेनं दायित्वम् अर्पितवान्। एवमेव वंशानुक्रमेण धीरगत्या सेननृपतयः तेषां स्वकीयं शौर्यं साम्राज्यं च वर्धितवन्तः। अपि च, विश्वरूपसेनस्य राजत्वेऽवसिते सेनराजगणाः दीर्घकालं यावत् राजत्वं कर्तुम् असमर्थाः आसन्। मिनहाजउद्दीनस्य साक्षप्रमाणात् इदं मन्यते यत् १२४ ख्री. अथवा १२६० ख्रीष्टाब्दं यावत् सेनराजानः राजत्वं कृतवन्तः। न केवलं पालसेनराज्ञां समये, अपि तु चिरं यावत् भारतवर्षः कृषिप्रधानः देशः इत्येवंरूपेण परिचितः। अस्य खलु देशस्य अधिकसंख्यकानां मनुष्याणां ग्रामे वासः। ते च बहुविधानि शस्यानि फलानि च उत्पादितवन्तः।

बङ्गदेशे कृषिक्षेत्रे भूमिव्यवस्थायाः विशेषं गुरुत्वमासीत्। अस्मिन् कृषिप्रधाने समाजे अर्थनीतौ च भूमिव्यवस्थायाः स्थानमासीत् मुख्यम्। अष्टमशताब्द्याः द्वादशशताब्दीपर्य्यन्तं ताम्रशासनावल्यां राज्ञां दानकथा विवृता। पालयुतो धर्मप्रतिष्ठानम् उद्दिश्य भूमिदानं कृतम्। किन्तु, सेनयुगे सर्वविधं दानं प्रायः व्यक्तिगतम् आसीत्। दानकाले दानग्रहीतारं प्रति प्रदत्तानि सुयोगानि ताम्रशासनादिषु लिपिवद्धानि जातानि। धर्मपालस्य खालिमपुरताम्रशासने[१] ग्रामदानप्रसङ्गेन राष्ट्रियकर्मचारिणाम् उल्लेखेन शाकम् एका विस्तृता तालिका रचिता, कृषिजीवीश्रेण्याः कथा विवृता, तत्र च दानग्रहीतारं प्रति शास्तिः विहिता। अपि च, पीडाजनकदायित्वात् अथवा करप्रदानस्य दायित्वात् अव्याहतिः प्रदत्ता। एतानि सुयोगानि 'भूमिछिद्रन्याय' अनुसारेण प्रदत्तानि। अत्र 'भूमिछिद्र' शब्देन कर्षणयोग्या भूमिः बोध्यते। तस्याः कृते च राजस्वं प्रदेयं नासीत्। अतः राजस्वमुक्तेः रीतिमनुसृत्य यत् भूमिदानं तत् भूमिछिद्रन्यायमाश्रित्य दानम्। किन्तु, यदि कोऽपि ब्राह्मणः स्वयं भूमिक्रयं कृत्वा भू-स्वामी भवेत्, राजा तं सर्वप्रकारेण करमुक्तम् अकरोत्। यथा केशवसेनस्य इदिलपुरताम्रशासने[२] च विश्वरूपसेनस्य मध्यपाडाताम्रशासने[३] इयं व्यवस्था परिलक्षिता। भवतु तावत्,





पालसेनयुगे शासकाः उदारभावेन भूमिदाननीतिमनुसृत्य नवसृष्टभूम्यधिकारि श्रेण्याः आविर्भावः निश्चित आसीत्। दानग्रहीतारः ब्राह्मणाः न केवलं भूम्यधिकारं लब्धवन्तः, एतेन सह भूपृष्ठस्थस्य भूगर्भस्थस्य च सर्वासाम् सम्पदाम् अधिकारिणः सञ्जाताः। अपि च, ते वनजखनिजसम्पदाम् अधिकारं लब्धवन्तः। किञ्च, भूमिसंलग्ने जलाशये, नदेनद्यां च मत्स्यपालनस्य, मत्स्यशिकारस्य च सुयोगं लब्धवन्तः।

ग्राम्यभूमिः प्रधानतः त्रिप्रकारम् आसीत्। यथा- वास्तु (वासयोग्यम्), क्षेत्रं (कर्षणयोग्यम्) च खिलं (कर्षणयोग्यम् किन्तु यत् कर्षितं न) भवति स्म। प्रदत्तं भूखण्डं (ग्रामः) शासनः वा अग्रहारः इति नाम्ना ख्यातमासीत्। गृहस्थाः जनाः अस्मिन् भूमौ स्वाधीनरूपेण वसवासं कृत्वा स्वेषां क्षेत्राणां कर्षणं कृतवन्तः। पुनश्च देवखड्गस्य आस्रफपुरताम्रशासनात् ज्ञायते यत्, गृहस्थाः भू-स्वामिनः सन्तः अपि भागकर्षकैः वा क्षेत्रश्रमिकैः भूमिकर्षणं सम्पन्नं कृतवन्तः।

सप्तमशताब्दीं यावत् भूमिमानं निर्दिष्टमासीत् शस्यमानेन। किन्तु, पालसेनयुगे भूमेः कति अभिनवाः परिमापाः प्रवर्तिता अभवन्। पालयुगे भूमिमापस्य मानं किमासीत् तन्न ज्ञायते, यतः तदा अधिकेषु क्षेत्रेषु दानस्य वस्तु आसीत् एकः ग्रामः वा ततोऽधिकः ग्रामः। सेनयुगे समये उच्चतमं मानञ्चासीत् पाटकं वा शटकम्, निम्नतमं मानञ्चासीत् काकं च काकिनी वा काकिनिका। लक्ष्मणसेनस्य सुन्दरवनताम्रशासने[४] भूमिपरिमापकं शब्दद्वयं प्राप्यते। यथा- उन्मानं च उदानम्। श्रीचन्द्रस्य धुल्लाताम्रशासने हलं वा भूहनमिति विद्यते। गोविन्दकेशवस्य भाटेराताम्रशासने[५] विद्यते केदारः भू-केदारः वा। तदानीन्तने काले नलेन भूमि-परिमापम् अभवत्। भिन्नेषु कालेषु विभिन्नेषु अञ्चलेषु च नलस्य दैर्घ्यं भिन्नप्रकारम् आसीत्। यथा- समतटे समतटीयं नलं (विजयसेनस्य व्याराकपुरताम्रशासनम्), उत्तरराढे वृषभशङ्करनलम् (वल्लालसेनस्य नैहाटिताम्रशासनं च लक्ष्मणसेनस्य

अनुलियाताम्रशासनम्), वरेन्द्र्यां तत्रत्यदेश-व्यवहारोपयोगि नलम् (लक्ष्मणसेनस्य तर्पणदीघिताम्रशासनम्)।

अपि च, कृषौ अनुकूलभौगोलिकपरिवेशस्य गुरुत्वम् आसीत् अतुल्यम्। साम्राज्यस्य चतुर्दिक्षु नदीवाहिता उर्वरा मृत्तिका आसीत् कृषिकार्ये अनुकूला। किञ्च, सप्तमशताब्द्यामपि वनभूमिकर्तनेन कृषिभूमिनिष्काशनस्य पद्धति अव्याहता आसीत्। एतस्य च कारणम् आसीत् जनसंख्यायाः जनवसतेश्च बृद्धिः। तथापि, कृषिः कस्मिन्नपि जनपदे सीमाबद्धा नासीत्। हिउयेनसाङ्प्रस्तुतात् विवरणात् ज्ञायते यत्, ख्रीष्टीयसप्तमशताब्द्यां प्राचीनेषु जनपदेषु कृषिजद्रव्योत्पादनेन समृद्धिः सञ्जाता। नव्यप्रस्तरयुगे प्राचीनकृषिपद्धतिद्वारेण धान्योत्पादनम् अभवत्। परववर्तिकाले कृषिविप्लवे सति लौहप्रयुक्तेः प्रयोगः प्रारब्धः।

ख्रीष्टपूर्वतृतीयशतकस्य महास्थानखण्डितप्रस्तरलेखात्[६] ज्ञायते यत्, तत्काले आपत्कालीनशश्यागारः धान्यसञ्चयस्थानं वा स्थापितम् आसीत्। कालिदासस्य रघुवंशम्[७] इति महाकाव्ये बङ्गवासिनां धान्यशिशुवपनस्य विवरणं प्राप्यते। सन्ध्याकरनन्दीविरचिते[८] रामचरिते धान्यसंग्रहात् परं मरारविषये अथवा व्रीह्यगार विषये वर्णनं विद्यते। तत्काले अन्यान्यशस्यापेक्षया धान्योत्पादनस्य गुरुत्वं समधिकम् आसीदिति लक्ष्मणसेनस्य आनुलियाताम्रशासने[९] च केशवसेनस्य इदिलपुरताम्रशासने उपलभ्यते। बङ्गदेशे आर्याणां वसति विस्तारे सति गोधूमस्य यवस्य च उत्पादनम् आरब्धमभवत् इत्येवानुमीयते। बङ्गदेशे धान्यात् परं स्थानं लब्धवान् इक्षुः। कालिदासस्य रघुवंशम्[१०] काव्ये इक्षु-उत्पादनस्य उल्लेखः दृश्यते। सुश्रुतसंहितायां[११] रामचरिते च इक्षुजातस्य रसस्य च वर्णनं विद्यते। षोडशे शतके दुयार्ते वारवोसा अवदत्, भारतवर्षस्य विभिन्नेषु वन्दरेषु सिंहले, आरवे च पारस्ये शर्करारप्तानिकार्य्ये बङ्ग आसीत् दक्षिणभारतस्य प्रधानः प्रतिद्वन्द्वी।

न केवलं धान्यं च इक्षुः, एतद्वयं विना कृषिजद्रव्याणां मध्ये प्रधानानि द्रव्याणि आसन-नारिकेलम्, जाम्बुरा, गुवाकम्, निम्बुकम्,





ताम्बुलम्, कदली चेत्यादीनि। रामचरिते ग्रन्थे महुयायाः च एलाचस्य उत्पादनकथा श्रुयते। अपि च, पालसेनयुगयोः लेखमालायां विभिन्नेषु स्थानेषु आम्र-पनसप्रभृतीनि फलानि उल्लिखितानि। लक्ष्मणसेनस्य गोविन्दपुरताम्रशासने डालिम्बक्षेत्रस्य उल्लेखः विद्यते। विश्वरूपसेनस्य साहित्यपरिषत्ताम्रशासने[१२] ताम्बुलक्षेत्रम् उल्लिखितम्। वनजसम्पदां नामानि काष्ठं वंशम् इत्यादीनि, जलजसम्पदां मध्ये मतस्यादीनाम् उल्लेखः कृतः। प्राणिनां तथा वन्यप्राणिनां मध्ये गो-वानर-मृग-वराह-अश्व-उष्ट्रप्रभृतीनां नामानि उल्लेखयोग्यानि। किञ्च, आञ्चलिक-सीमावद्धतायाः विद्यमानत्वेऽपि शिल्पोत्पादनं स्वतन्त्रतयावैशिष्ट्यं स्थापयति। अतः आञ्चलिकतानुसारेण विभिन्नस्थानानां विभिन्नद्रव्यानां उत्सानुसारेण शिल्पीजनाः तेषां यथोचितव्यवहारैः शिल्पस्य क्रमविकाशं कृतवन्तः।

अस्माकं देशः भारतवर्षः प्राचीनकालात् वस्त्रशिल्पस्य कृते प्रसिद्धिं लब्दवान्। महामतेः कौटिल्यस्य अर्थशास्त्रे[१३] 'कार्पासिक' इति नाम्ना तान्तुनिर्मितस्य वस्त्रस्य उल्लेखोऽस्ति। वस्त्रशिल्पे कार्पासवस्त्रमासीत् प्रधानम्, चर्यापदेऽपि कार्पासोत्पादनस्य कृषिकथा श्रुयते। अपि च, प्राचीने बङ्गे रेशमचाषोऽपि उन्नततर आसीत्। वस्त्रवयनशिल्पश्च आन्तर्जातिकव्यापारे भूयसीं ख्यातिं लब्धवान्। 'पेरिप्लास अफ् दि एरिथ्रान् सी'[१४] इत्यस्मात् ज्ञायते यत्, 'मसलिन्' इत्यासीत् उल्लेखयोग्यमेकं रप्तानीपण्यम्।

तथापि मृतशिल्पीवृन्द आसीत् बङ्गस्य चिरायतः उत्तराधिकारी। मृण्मयानि द्रव्यानि द्विधा विभक्तानि आसन्, यथा- तैजसपत्राणि दग्धमृत्फलकानि च। ख्रीष्टीये अष्टमे शतके किंवा नवमे शतके पाहाडपुरे तैजसपत्रादेः निदर्शनं प्राप्यते। किञ्च, दग्धमृत्फलकानाम् आविष्कारः येषु खलु स्थानेषु सञ्जातः, तेषां नामानि यथा- महास्थानं (वगुडा), साभारः (ढाका), चन्द्रकेतुगडः (२४ परगणा), पाहाडपुरम् (राजशाही), ताम्रलिप्तः (मेदिनीपुरम्), मङ्गलकोटः (वर्धमानः)

इत्यादीनि। एतद्व्यतिरिक्तानि अन्यानि अपि स्थानानि सन्ति। एते च सर्वे मृत्शिल्पाः बङ्गदेशस्य 'टेराकोटा शिल्पस्य' अग्रगतेः परिचायका इति वक्तुं युज्यते। किन्तु एते च मृत्शिल्पिनः प्रधानतः ग्रामाञ्जलेषु शिल्पसाधनां कृतवन्तः।

पालसेनयुगे च धातुशिल्पस्य नितराम् उन्नतिः सम्भूता। पाहाडुर, केशवसेनस्य इदिलपुरताम्रशासनात् लौह-ब्रोञ्ज-इत्यादि अष्टविधानां धातुनां व्यवहारः विज्ञायते। मिन्हाजः अलिखत् यत्, लक्ष्मणसेनः स्वर्णरौप्यनिर्मितेषु पात्रेषु आहारम् अकरोत्। तस्य नैहाटिलेखे परिचारिकानाम् अमूल्यालंकारसज्जायाः वर्णनं विद्यते। विजयसेनस्य देअपाडाप्रशस्त्याम्, वल्लालसेनस्य नैहाटिताम्रशासने च सन्ध्याकरनन्दीरचिते रामचरिते पुरुषाणां नारीणाञ्च प्रस्तरखचितालंकार व्यवहारस्य उल्लेखः अस्ति।

तत्काले अर्थनैतिकजीवने तक्षणशिल्पस्य विशिष्टमेकं स्थानमासीत्। प्रस्तरेण, दारुणा च गजदन्तेन च एतानि निर्मितानि आसन्। किञ्च, प्रधानानि शिल्पानि विना कानिचित् अप्रधानानि शिल्पानि अपि आसन्। यथा- शङ्खशिल्पम्, पुष्पशिल्पम्, मिष्टान्न-मत्स्य-मद्यशिल्पानि, पटशिल्पम् इत्यादीनि। एतस्मादेव शङ्खकारः, मालाकारः, धीवरः, तैलकारः, कर्मकारः, स्वर्णकारः, तन्तुवायः, गन्धवणिक् प्रभृतयः शिल्पीसम्प्रदायाः दृश्यन्ते। अनेन इदं प्रतीयते यत्, तत्कालीनः समाजः यथा विविधैः वर्णैः विभक्त आसीत्, तथैव च विभिन्नैः अर्थनैतिकश्रेणिभिः विभक्तः आसीत्। अपि च, कदापि वर्णश्च श्रेणी परस्परं मिलितौ सञ्जातौ। शिल्पीनां गोष्ठी वा संघ आसीत्। वैयाकरणः पाणिनिः 'संघ' शब्दस्य अर्थः 'समूह' (Collection) इति व्याख्यातवान्।[१५] कुलिक आसीत् शिल्पीगोष्ठीनां नेतृस्थानीयः। विजयसेनस्य देओपाडाप्रशस्त्यां राणकशूलपाणिः 'वारेन्द्रशिल्पगोष्ठी-चूडामणिः[१६] इत्यभिहितः। अस्य गोष्ठीयगठनस्य तावत् उद्देश्यमासीत्—अल्पसमयेन शिल्पोत्पादनबृद्धिः, वैचित्र्यबर्धनं तथा च मानोन्नयनम्।





इदमुच्यते यत्, एतानि कृषिजद्रव्याणि च शिल्पजातानि द्रव्याणि स्थलपथेन जलपथेन च देशस्य विभिन्नेषु स्थानेषु प्रेरिताणि। एवं च देशस्य अर्थनैतिकावस्थायाः प्रभूता उन्नतिः संघटिता। 'अर्थनीति' शब्दस्य अर्थः खलु अर्थसम्पर्किता नीतिः वा नियमः। 'अर्थ' शब्देन साधारणतः जीविकायाः उपयः बोध्यते। अर्थात्, जीविकासन्धानरतेन मुनष्येण सृष्टा सम्पद् 'अर्थः'। कौटिल्यस्य अर्थशास्त्रग्रन्थे[१७] अर्थ इत्यनेन मनुष्यवती भूमिः ज्ञायते। प्राचीनकाले बङ्गदेशे तथा च भारतवर्षे कृषिः च शिल्पम् अर्थसंग्रहस्य उपायस्वरूपम् आसीत्। पालसेनयुगे ग्रामकेन्द्रिक-कृषि-शिल्पनिर्भरान् अर्थनीतिं प्रति समधिकं गुरुत्वम् आरोपितम् आसीत्। अतएव कृषिशिल्पसहयोगेन पालसेनशासकाः अर्थनीतिम् उपजीव्य समृद्धशालिनम् एकं साम्राज्यं प्रतिष्ठितवान्—अस्मिन् विषये नास्ति कोऽपि सन्देहः।

——

## References


1. Ramaprasad Chanda, Akshay Kumar Maitreya (ed.), *Gourarajmala*, Dey's Publishers, Kolkata, 2005.
2. Mukherjee & Maity (ed.), *Corpus of Bengal Inscriptions*, Farma K.L. Mukhopadhyay, Calcutta, 1967.
3. Ibid.
4. Ibid.
5. Ibid.
6. Ibid.
7. *Kalidasa*, Haksar (Tr. by), *Raghuvamsam : The Line of Raghu*, Penguin, UK, 2016, 4th Canto.
8. *Ramcharitam Kabiprasasti*, sl. 13.
9. Op. cit, Mukherjee & Maity (ed.).
10. Op. cit. *Kalidasa*.
11. Anant Ram Sharma (ed.), Susruta Samhita of Maharsi Susruta, Chaukhamba Surbharati Prakashan, Varanasi, 2015.
12. Op. cit, Mukherjee & Maity (ed.).
13. Pro. Indra (Tr.), *Kautilya Arthashastra* (Hindi), Rajpal & Sons, Publication, Delhi, 2013.
14. Wilfred H. Schoft, *The Periplus of the Erythracan Sea*, Kessinger Publishing, United States, 2017.
15. Sumitra K. Katra (Tr.), *Astadhyayi of Panini*, Motilal Banarsidass, Kolkata, 2015, 3/3, 86.
16. N.G. Majumdar (ed.), *Inscriptions of Bengal* (Vol. III), The Varendra Research Societyo, Rajshahi, Bangladesh, 1929, Appendix.
17. Op. cit. Pro. Indra.






## Select Bibliography


1. Chand, Ramaprasad, Akshay Kumar Maitreya (ed.), *Gourarajamala*, Dey's Publishers, Kolkata, 2005.
2. Chattopadhyay, Bhaskar, *Gour-Banger Itihas O Sanskriti* (2nd. Part), Granthamitra Publishers, Kolkata, 2011.
3. Chattpadhyay, Sunil, *Prachin Bharater Itihas* (2nd Part), Paschimbanga Rajya Pustak Parishad, Kolkata, 1983.
4. Dutta, Bhupendra Nath, *Bharatiya Samaj Paddhati* (2nd Part), Navabharat Publishers, Kolkata, 1983.
5. Haksar (Tr. by), *Raghuvamsam* : The Line of Raghu, Penguin, UK, 2016.
6. Indra (Tr. by), *Kautilya Arthashastra* (Hindi), Rajpal & Sons Publication, Delhi, 2013.
7. Katre, Sumitra K. (Tr. by) *Astadhyayi of Panini*, Motilal Banarsidass, Kolkata, 2015.
8. Majumder, N. G. (ed.) *Inscriptions of Bengal* (Vol III), The Varendra Research Society, Rajshahi, Bangladesh, 1929.
9. Majumder, R. C., *Bangla Desher Itihas* (2nd Part), General Printers and Publishers Pvt. Ltd., Kolkata, 1385 Bangabda.
10. Mukherjee & Maity, *Corpus of Bengal Inscriptions*, Forma K.L. Mukhopadhyay, Calcutta, 1967.
11. Sarkar, D. C., *Pal-Sen Yuger Vamsanucharita*, Sahityalok, Kolkata, 1982.
12. Sircar, D. C,, *Select Inscriptions bearing on Indian history and civilization*, University of Calcutta, Calcutta, 1942.
13. Schoft, Wilfred H., *The periplus of the Erythracan Sea*, Kessinger Publishing, United States, 2007.
14. Sharma, Anant Ram (ed.), *Susruta Samhita of Maharsi Susruta*, Chaukhamba Surbharati Prakashan, Varanasi, 2015

# कर्मयोगस्याभिबृद्धयर्थं श्रीमद्भगवद्गीता

ड. श्वेतपद्मा शतपथी

प्राचीनमहाकाव्येषु महाभारतमतीव विशालम्। तस्य भीष्मपर्वणः अंशरूपेण श्रीमद्भगवद्गीता प्रसिद्धा। यथा खीष्टधर्मे वाइवेल, मुसलिम्सम्प्रदाये कुरान्, इस्लामधर्मे जेन्दावेस्ता, शिखधर्मे गुरुग्रन्थसाहेव इत्यादयः ग्रन्थाः मान्यन्ते, तथैव सनातनवैदिकहिन्दुधर्मे श्रीमद्भगवद्गीता। तथापि श्रीमद्भगवद्गीता सम्पूर्णमानवजातेः एकः मूल्यवान् ग्रन्थः। यतः सनातनधर्मः मानववादस्य उपरि आधारितः।

श्रीमद्भगवद्गीतायाम् अष्टादशाध्यायाः सन्ति। कर्मक्षेत्रे दक्षता प्रतिपादनार्थं श्रीमद्भगवद्गीतायाः तृतीयाध्याये कर्मयोगः प्रदर्शितः। कर्मक्षेत्रे त्यागपूर्णमनोभावेन निष्ठापूर्वकं स्वस्वकर्तव्यसम्पादनमेव कर्मयोगस्य वैशिष्ट्यम्। कर्मक्षेत्रे ये प्रवीणाः, ते क्रियावन्तः एव विद्वांसः। अतः हितोपदेशे उच्यते–

शास्त्राण्यधीत्यापि भवन्ति मूर्खाः
यस्तु क्रियावान् पुरुषः स विद्वान्।
सुचिन्तितमौषधमातुराणां
न नाममात्रेण करोत्यरोगम्॥

(हितोपदेशः, कथा–४)

श्रीमद्भगवद्गीतायां कर्मविषये बहुसूक्ष्मातिसूक्ष्मतत्त्वानामुपस्थापनं कृतम्। किं कर्म किमकर्मेति कवयोऽप्यन्न मोहितः। वस्तुतः कीदृशं कर्म यथार्थ कीदृशं अयथार्थं भवति, सन्देहः भवति। किन्तु अन्ततोगत्वा–कर्म अवश्यं करणीयम्। न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्–इत्यादि उपदेशद्वारा कर्मणः प्राधान्यं भगवता प्रतिपादितम्।





संसारे ये ये जनाः अति उन्नतं स्थानमारुढवन्तः, अथवा यशः कीर्तिः वा प्राप्तवन्तः, ते केवलं कर्मद्वारा तत् साधितवन्तः। महात्मागान्धी कर्मयोगी आसीत्। तथैव स्वामी विवेकानन्दः। उत्कलमणिपण्डितगोपबन्धुदासेन उक्तम्–

मानवजीवननुहइ केवल वर्षमासदिनदण्ड।
कर्मे जीए नर कर्म एका तार जीवनेर मानदण्ड॥

एकेन आमेरिकान् कवि Henry Longfellow द्वारा कर्मणः महत्वविषये उक्तं यत्–

But to Act, that each Tomorrow
Finds us farther than Today.

अर्थात् अद्य वयम् एवं कर्म कुर्मः, येन अस्माकं श्वः अद्यापेक्षया सुन्दरतरः, अधिकः मङ्गलमयश्च भविता। तेनैव कविना कर्मणः गुरुत्वप्रसङ्गे पुनः उक्तं यत्–

Act Act in the living present,
Heart within and God overhead.

अर्थात् अस्माकम् अभ्यन्तरे कश्चन उत्साहः अस्ति, उपरि विश्वनियन्ता भगवान् विराजते। अतः वर्तमानसमये केवलं कर्म एव करणीयम्। कर्मकरणसमये अस्माकं फले स्पृहा न भवेत्। अतः गीतीयाम् उक्तम्–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

सर्वदा स्वीयकर्मसम्पादनार्थं श्रीमद्भगवद्गीता उपदिशति। यथा–

नियतं कुरुकर्मत्वं कर्मज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः॥

(गीता–३/४)

अर्थात् हे अर्जुन! त्वं नियतं कर्म कुरु। अकर्मपेक्षया कर्मणः महत्त्वं विद्यते। यदि त्वं कर्म न करोषि, तर्हि तव शरीररथः न प्रचलिष्यति।

भगवान् कथयति यत् अयं समग्रः लोकः कर्मबन्धनः। तदर्थं कर्म कौन्तेय! मुक्तसङ्गः समाचर। (गीता ३/९)

अत्र मुक्तसङ्गस्य तात्पर्यं भवति यत्-यदा वयं कर्म कुर्मः, तदा अस्माकं तस्य कर्मणः फले आसक्तिः नैव भवेत्। अवश्यं यदि वयम् उत्तमं कर्मकुर्मः, उत्तमं फलमवश्यं प्राप्स्यामः। किन्तु यदि अनासक्ताः सन्तः कर्म कुर्मः, तदा यदि उपयुक्तं फलं नैव लभ्यते, तदा वयं निराशा वा वीतस्पृहाः न भवेम। उक्तं हि-

जनोऽत्र यः कर्म करोति यादृशं
स सर्वदा तादृशमश्नुते फलम्॥

अनेनैव आङ्ग्लोकविना Henry Longfellow महोदयेन उक्तं यत्-

Learn to labour and to wait. (A plasm of life)

अस्माकं कर्म भवति यज्ञः। अयं कर्मयज्ञः इति नाम्ना प्रसिद्धः। अयं यज्ञः प्रतिदिनं करणीयः। भगवान् ब्रह्मा यदा इमां सृष्टि सृष्टवान् तदा तया सार्धं यज्ञस्यापि सृष्टिं कृतवान्। तथा च सर्वाः प्रजाः उपदिष्टवान्-प्रतिदिनं कर्मयज्ञसम्पादनार्थम्। गीतायाः कर्मयोगे उल्लिखितमस्ति-

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेव वोऽस्त्विष्टकामधुक्॥

(गीता ३/१२)

यदि अयं यज्ञः प्रतिदिनं क्रियते तर्हि अनेन कर्मणा विश्वस्य महान् उपकारः साधितः भवति। यथा-

यज्ञात् भवति पर्जन्यः
यज्ञः कर्मसमुद्भवः॥

(गीता ३/१४)

गीतायां कर्मयोगे भगवता व्यासेन विशिष्टकर्मयोगिनः जनकस्य उदाहरणं प्रदत्तम्। तेन उक्तं यत् जनकादयः ऋषयः कर्मद्वारा एव महतीं सिद्धिं प्राप्तवन्तः। ते कर्मयागिनः। उक्तम-





कर्मणैव हि संसिद्धिमास्थिताः जनकादयः। (गीता ३/२०)

एतदर्थमस्माभिः सर्वदा उत्तमं कर्म करणीयम् इति गीतायाः उपदेशः। यदि श्रेष्ठाः उत्तमं कर्म कुर्वन्ति, तर्हि अन्ये तेषाम् अनुकरणं करिष्यन्ति। तेन समाजस्य महान् उपकारः भवति। अतः उक्तम्-

यद् यद् आचरति श्रेष्ठः तद् तदेवेतरोजनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते॥

(गीता ३/२१)

अतः अस्माभिः सर्वैः उत्तमं कार्यं करणीयम्।

——

# वेदेषु दार्शनिकभावना, एकमध्ययनम्

सन्दीपकुमारघोषालः

भारतीयदर्शनप्रस्थनस्यायमारम्भः प्राग्वैदिककालादासीत्। तत्र दार्शनिकचिन्तनस्य चेतनायाः तात्त्विकविचारः अतिगम्भीरतया अनुसन्धानसरणीमाश्रित्य मन्त्रद्रष्टृभिः तपोधनैः कृतोऽवलोक्यते। वैदिकसात्यिं निखिलचेतनाया आकर संस्कृतवाङ्मये राजतेतराम्। तत्तादृशस्य साहित्यानुशीलनाय एकं जन्मपर्याप्तं न भवेदिति विश्वस्मि। वैदिकदर्शनम् आर्षदर्शनत्त्वेनाख्यातम्। मन्त्रद्रष्ट्राणां ऋषीणां निरन्तरतपश्चर्यया, परिणतिभूतेदं दर्शनशास्त्रं यस्मिन् अव्यक्तम्, अनिर्वचनीयम्, अवाङ्मानसगोचरम्, सूक्ष्मात् सूक्ष्मतरम्, स्थूलात् स्थूलतरं तदेव भूमारूपमासीत्। एतादृशस्य सत्यज्ञानानन्दस्वरूपस्य परं ब्रह्मणः ज्ञानेन सकलार्थप्रहाणं भवतीति दार्शनिकः आचार्यः तत् तत्वजिज्ञासां प्रतिजानीते।

असारेऽपि नासारे सर्वतो भव्यभावविधया प्रतीयमानेऽस्मिन् संसारे लब्धजन्मनो जन्मिनो मानवतः स्वजनकुदेशगौरवस्य कृते सर्वतो भावेन किमुत प्राणार्पणेनापि परिपणनं परमपुरुषार्थः यतो हि जगति ज्ञानवतां तत्रापि धर्माधर्मविवेकवता पुंसां मध्ये मनुष्यव्यपदेशं लभमानः को नाम न यतेत स्वात्मवृतये? स एभ किल महाभागः स्वयं समुत्पद्य समुत्सृज्य चानेनानित्येन पाञ्चभौतिककलेवरेणेहाविनाशिकीर्ति धवलितादशादिङ्मण्डलं यशः कलेवममुत्र चाप्यनेक दिव्यानिर्वचनीययोगभुजं प्रति

अवतिष्ठते च चिरं चिरस्मरणीयतां गतेऽपि पञ्चभूतसमवायिविग्रहे अनन्यसाधारणं कर्म कुर्वाणो जनो यशोविग्रहेणेति नाविदितं प्रज्ञावताम्। आसन् किलानेके क्षितितलमण्डलमण्डलायमानाः प्रातस्स्मरणीयकीर्तिकलायाः यसोऽवतंसितदशादिशो भावुका महात्मानः





येषां दुरतिगुरुगिरिन्द्रदलनवज्रायमाणं यशः पटलं पापपूरपङ्किलं धरातलमद्यापि सततं धवलभपतिधवलयदेवास्थास्यते चासंसारमित्यत्र नास्ति नः स्तोकमपि सन्देहः इति जानन्नेव प्रयतते मनुष्यजन्मा जन्मवतां जन्मिनां गणनायां स्वाधिकारलाभाय यावज्जीवं सर्वदा सर्वतो भावेनेति निर्विवादम्। सत्यमुक्तं केनापि कविना–

सजातो येन जातेन याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः को वा न जायते॥[1]

प्रज्ञावन्तः चलाचलेऽस्मिन् रथचक्रवदाकारे परिवर्तिनि संसारे को नाम न जायते म्रियते वा प्राणी? प्रतिधस्त्रं सहस्रो विलीयन्ते स्युत्पद्यन्ते अत्र प्रतिसन्धाः। का नाम तेषां गणना यतश्चायं खलु स्वभाव एव संसारस्य जनिर्मरणं पुनरपिजननं पुनर्मृतिः अन्वर्थेयं संसरणशीलस्य जगतः संसार इति संज्ञा। किञ्च एव एवायं संसारपरिपाक इति सुनिपुणं विचिन्वानाः प्रतिक्षणं विलोकयन्तश्च गतागतं जीवसमवायस्य न जानन्ति प्रबलतरमोहान्धकाराच्छन्नदृष्टयो मूढा एतदवस्थामेवात्मनोऽपि परिणतमित्याश्चर्यजनान् हि को नामास्मिन्नासज्येत? स चायं संसारः स्थावरजङ्गमभेदाभ्यां द्विधा व्यपदिश्यते। तत्र च तरुशैलाद्यात्मकः स्वतोगतिविकलोऽन्तर्दिक् प्रथमः, पञ्चेन्द्रियपञ्चप्राणादिप्रकृतिकला कलासम्पन्नः स्वतो गतिमान बहिर्दिगपरः उभयतश्चावान्तरभेदाः परिसंख्यातुमशक्या एव। तत्र जङ्गमेऽस्मिन्न लब्धजन्मिनो भवति जीवनं मरणञ्च शोचनीयं स्मरणीयमनुकरणीयञ्च। आधिक्यं चात्रापि प्राणिसन्धे धर्म्माधर्मविवेकवतां मनुष्याणामेव यतो हि न चराचरेऽस्मिन् जगति मानवव्यतिरिक्ताः प्राणिनः स्वस्य परेषां वापकर्तुं शक्ताः अतो मानवधर्मानुगतं मानवजीवनं मरणं वा विशेषतः परेषां शोचनीयं स्मरणीयमनुकरणीयञ्च भवति किमिदं जीवनं नामेति चेत्?

अज्ञानविवेकाभिमान एवादिसमुद्भूतकर्म्मजन्यं पञ्चमहाभूतकार्यं नानुकम्पयमाना जीवनादधिकं रक्ष्यमाणाधनपुत्रमित्रकलत्रादयः? कति न गता गच्छति गमिष्यन्ति च सखायः गृहकेशविभवाः शुनासीरवैभवाः

 ISSN 2320-2025

राजानो धनिनश्च ऐहिकमनेकक्लेशोपार्जितं धनमित्राद्यखिलमुपकरणमपहाय। एष्वन्यतमोऽपि दृष्टः केनापि क्वापीति मनसि सुनिपुणं विभावनीयं प्रज्ञानबद्धिः ऐन्द्रजालिक कर्मेवानुभूयमानस्वप्रमिवेदमखिलमपीति सुनिश्चितम्। अस्तु नित्यमनित्यं सत्यमसत्यं वा सुखदुखाध्यात्मकं यत्किमपि ऐहिकमलौकिकं तत्सर्वमपि जीवनमधिष्ठायैव समाप्ते ह चायुषि व्युत्क्रान्ते च जीविते न किमपि, अत एव बहुमन्यते प्राणिवर्गैकलोके तदेतज्जीवितं नाम। कष्टात्कष्टतरायामपि दशायां न शक्नोति प्राणी ऐहिकानेकभोगाद्यनेकभोगाद्यभिलाषः सुखमसूज्झितुमिति किम्पुनरुत्कृष्टैहलौकिकपारलौकिकं सख्यभोगसाधनैकमात्रकारणधर्माधर्म–सत्यासत्यहिताहितविकेकैक मात्राधिष्ठानं मानवजीवनम्। तदेतद्बहूनां जन्मनामान्ते कोटिजन्मोपार्जित सुकृतराशिभिरुपलभ्यं प्राणिभिरिति प्राङ्गनिरूपितम्। सत्येवं को नाम न मन्येत विवेकी लोकद्वयसुखहेतु कर्मसाधनभूतं दुःखात्यन्तनिवृत्तिज्ञान साधनैकमात्रकारणं मानवजीवनं नाम।

ननु मानवाः! प्रियाप्रियतरस्य लोके किमिव स्थैर्यमस्ति? उपनियतकालिकमेवेदं जीवनं तद्धर्मसाधनैकाश्रयं जीवितरन्तमिदमुपलभ्य ानवजीवनं मा वृथा कृद्वम्। यतो धर्मसाधनैकमात्राधिष्ठानमिदं धर्मार्थमेवोपलभ्यते प्राणिभिर्मावनशरीरम्। शरीरान्तरेण च कल्पकोटिभिरपि दुःसाध्य एवायं धर्मः। धर्मस्य मानवशरीरस्य चानन्यविषयोऽन्यासाधारणञ्च सम्बन्धः। यो हि मानवशरीरमासाद्य न जानाति न करोति नोपदिशति च धर्मं न प्रयतते वा धर्मपद्धतिमात्मसात्कर्तुं किं नाम तस्य मानवशरीरस्य फलम्। आहारादिकञ्च क्रियत एव सर्वैरेव प्राणिभिः। धर्मेण हीनाः पशुभिः समाना इति सुनिरूपितं प्राक्। धर्म एवास्य प्राणिनः सत्यं सुहृत्सहायकः सखा बान्धवश्च, नहि पञ्चाङ्गतङ्गे पञ्चभूतकलेवरे पितरो भार्या पुत्रमित्राणि बान्धवाः वा सहायिनो भवन्ति तदेक एवायं परत्रापि



 ISSN 2320-2025

सहायार्थमनुयाति करोति चासाधारणं साहाय्यमिति सत्यं सखा सुहृत् सहायको बन्धवाश्चायम् ऋत्मुक्तं केनापि कृतिना–

मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति॥[२]

मानवाः! विचारस्यायमवसरो ननु किं नाम सुतवात्सल्यलालितं याभ्यामिदं कलेवरं प्राणतोप्यधिकं शयनासनभोजनादिषूपचरितं तवानुयातः। आसीद्या प्राणतोऽप्यधिका प्राणप्रेयसी प्रणयिनी प्रियं सानुयाति आप्तयं मित्राणि बान्धवा वा नैषामन्यतोऽपि गन्तुमुत्सहते शक्तनोति वा तदानीम्। तवदेवैते प्रत्युपकारलोभानिधतधियो ह्यत्मीया यावदस्ति जीवितधनम्। व्युत्क्रान्ते जीविते कः कस्य क्षमपि व्यत्क्राजीवितं कलेवरं न पारयन्ते पूर्ववद्भ्यवहर्तुमात्मसाद्यात्कर्तुं वा। ये हि खलु पूर्वं पतिपुत्रपितृमित्रबान्धवाः स्नेहेनासकृद् व्यवहरन्ति त एव पश्चात् स्मारं स्मारं च स्वसुखसन्ततीसदनपरायणाः सवस्वगृहमनुमयान्ति। एवमेवायं खलु संसारव्यवहारः। शृण्वन्तु कृतधियः, तदेतल्लोकेऽनिर्वचनीयं सर्वप्रियञ्च जीवनं नाम न अस्ति जीवनोपमं किमपि। अपारः खल्वस्य महिमा। न कथमपि कात्स्र्येन वक्तुं शक्यः। यतो हि यत्किमपि परिदृश्यमानमिदं तज्जीवनावलम्बनमेव गते जीविते न किमपि। अतो जगति सर्वप्रियं सर्वतोऽधिकं च जीवनमिदमित्यसकृदुपदिष्टं स्मरणीयम्। अहो कष्टमिदं प्रियादधिकस्य प्रियस्य स्वजीवनस्य न किमपि स्थैर्यं नापि नियममितः कालः। जीवनमिदमसारेऽस्मिन्ज्जगदुद्याने तेन विकसितकुसुमेन लब्धोपमं यस्स्वत एव म्लानं सदापतति व्यतिभूमौ न पुनरनिर्वचनीयां शोवामापत्स्यते कदापि। हा एतज्जानतोऽपि हतदैवा नाद्रियन्ते जीवनमिदम्। यापयन्ति च सर्वार्थसाधकं प्रियतमं जीवनरत्नं शिश्नोपदपरायणास्तत्रतत्र व्यसनपद्धतौ। इच्छन्ति चैवनेन यापनं जीवनकायस्य। किमु जानन्ति तेन लभ्यते खलु इहायुषो गतो विभागः कोटिद्रव्यव्ययेन प्रयत्नशतकेनापि इति विचारणीयं विचायदक्षैः।

अहोरात्ररूपमिदं कालचक्रं गृहीत्वा प्रतिप्रयच्छति किमुतायुषो भागम्? अपरावर्त्यः खलु यथा नदी प्रवाहः ततैवायमायुषो प्रसारः न कोऽपि वक्तुं समर्थो लोकः कः कियन्तं कालं स्थास्यतीति। सुदृढशरीरवयवसंस्थानां अंसलाः अप्यवलोक्यन्ते बाल्ये तरुण्य एव वा प्रियमाणास्तिष्ठन्ति चाल्पासवो गन्तुशक्ता अपि बहुकालम्। प्रेष्ठाः! नृत्यति करालः कालः केशान् गृहीत्वा करे न विज्ञायतेऽनिवार्यकामः क्रूरोऽयं खलु खलः कदा वा पादप्रहारेण व्युत्क्रान्तजीवनं विधास्यति इति। पूर्वं तावत् मानवीयमायुरेबाल्यं तदप्यनियतस्थिरञ्च। यः सर्वथा जीवति शतं जीवति शतायुर्वै पुरुषद्य इति श्रुतेः तत्राप्यल्पीयान् कर्त्तव्यभाग इति विवेचननीयमायुवभावेतृभिः यस्य यावदार्युनियतं ततोऽर्धं याति निद्रया चतुर्थांश्चायुषो व्येति बाल्ये रोगादिषु चेति सर्वजनप्रत्यक्षम्। प्रज्ञावन्तः कियानवशिष्टो भागः मानवशरीरमासाद्य मानवकर्मपद्धतौ परिचेष्टानार्थमिति सुसूक्ष्मया धिया विचार्यताम्। तत्रापि गतस्तु गत एव परावर्तितुमशक्यः कालः आगामिनि कास्थायुषोनित्यत्वात् अतो नास्थां कुर्वन्ति भूते भविष्यति च कालकर्मविभागपरिपाकविदुः कृतधियः कालज्ञाश्चेष्टन्ते च कर्मभूमिषु वर्तमानेनैव, इति मानवजीवनस्य चात्रकर्त्तव्यमुथतया प्राङ्निर्दिष्टो धर्मः यावानस्य मानवस्य च धर्मेण सह सम्बन्धः यच्चास्या सहयोगादाचारच्चैहलौकिकं पारलौकिकमपि फले तदखिलमपि स्मरणीयम्। स चायं धर्मे वर्णाश्रमादिविभागभेदत्तो विविधोऽनिर्वचनीयश्च उक्तञ्च केनापि कृतिना–

तर्कोप्रतिष्ठा श्रुतयश्चं भिन्नाः नैकोू मुनिर्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥[3]

वर्णाश्चत्वारो ह्याश्रमाश्च ब्राह्मण क्षत्रियविट्शूद्राश्च वर्णाः ब्रह्मचारिगृहस्थवानप्रस्थसन्न्यासस्ताश्चाश्रमाः एषाञ्च तत्र तत्र धर्मशास्त्रेषु न्यूनाधिक्येनोपदिष्टा धर्मा विवेकतव्या विस्तरभयान्नत्र लिख्यन्ते एतत्तु सुनिश्चितमेव मानवशरीरमासाद्य मानवेनाजीवनं धर्मपथेनैवानुसरणीयम्





धर्म एव सेव्यः कर्तव्यतया परेषामुपदेष्टव्यश्च एष एवास्य द्रढीयान् सुहृत् सहायकश्चेति। पञ्चाच्चामुं रक्षति स चैनं पालयति सर्वतो भावेन यश्च निहन्ति धर्म तं विनाशयति मूलतो धर्मः एवञ्च धर्म्मपरिरक्षतः सर्वं परिरक्षितं भवति विनशयतश्च निखिलं विनाशितं भवति इति स्वश्रेयसमिच्छता कृतिना सर्वतोभावेनात्मपरित्राणांर्थ धर्म्म एव पालनीयः सेवनीयश्च उक्तं हि मानवधर्म्मविदा धर्म्माविदांवरेण मनुना–

धर्म एव हतो हन्ति धर्म्मो रक्षति रक्षितः।
तस्माद्धर्म्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्।।

हतो धर्मो नो मा वधीत्, इति न हन्तव्यो धर्मः कल्याणमिच्छतोभयत्र एवं सत्युभयलोकश्रेयस्करं सत्यबन्धुं धर्म्यं ये परित्यजन्ति वालिशा भवन्ति चान्यत्रशक्ता विनाशिभावेषु सुखेप्सया मृगतृष्णान्धितधियस्ते पालयन्तेवात्मानुभयतः न लभन्ते च दुर्लभं मानवशरीरं लब्ध्वाऽपि मानवजीवनफलं वृथैव यापितं भवति मूढैस्तैर्जीवनरत्नमिदम्। को नाम तेषामकृतधर्माणामिह परत्र वा सहायकः स्यात् दृश्यन्ते यद्यपि साहाय्यं कुर्वाणस्तत्र तत्र विषयेषु मित्रकलत्रबान्धवादयो लोकेऽस्मिन् कृतबुद्धिभिः तेऽपि किमु धर्माहते लभ्याः केनाप्यनुकूलयायिनः सुखैकहेतवश्च नावलोक्यन्ते अत्यैव, परेऽननुकूलदैवाः केनापि सुकृतेनावाप्यापि धनादिकं सुखलेशमप्यननुभवन्तः। किमत्रकारणम्? दैवापरपर्यायधर्मप्रातिकूल्यमेव। अत उभयत्र सूखार्थं सहायार्थञ्च धर्म एव सेव्यः परत्र सहायार्थन्तु नितरामेव नामुत्र सयायर्थमेते गच्छन्ति। ऋतमुदितं केनापि प्रेक्षावता–

नामुत्र हि पिता माता सहायार्थञ्च तिष्ठतः।
न पुत्रदारान् ज्ञातिधर्मस्तिष्ठति केवलम्॥
विद्या मित्रं प्रवासेषु भार्य्या मित्रं गृहेषु च।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च॥[४]

इत्यत्र च शब्दो विशेषतो विमर्षणीयः। सचायं धर्मः षड्विधो लोके लोकव्यवहारनिर्वहरणार्थं निर्दिष्टः। तद्यथा वर्णधर्मः आश्रमधर्मः

वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मः साधारणधर्मश्चेति। तत्र वर्णसाधारण्येनोपदिष्टो धर्मा वर्णधर्मः यथा नित्यं मद्यं ब्रह्मणो वर्जयेदित्यादिः, आश्रमधर्मो यथा अग्नीन्धनभैक्षचर्यादिः वर्णाश्रमधर्मो यथा पलाशो दण्डो ब्रह्मणस्येत्यादिः, गुणधर्मो यथा यथाविधि शास्त्रीयाभिषेकादियुक्तस्य भूपतेः प्रजापालनादिः निमित्तं प्रायश्चित्तं साधारणधर्मश्चाहिंसादिः, न हिंस्यात्सर्वाभूतानि इत्याचाण्डालं साधारणोऽयं धर्मः। मनुनापि साधारण्येन सर्वमुस्मृत्य दशकं धर्मलक्षणं निर्दिष्टं तद्यथा–

धृतिः क्षमादमोस्तेयं शौचमिन्द्रियनिग्रह।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥[5]

तदेतस्य दशलक्षणकस्य धर्मस्य यथाशास्त्रमनुष्ठानं मानवमात्रस्य मुख्यं कर्म। ये सर्वसाधारण्येनोपदिष्टा धर्मास्ते सर्वेषामेवोपसेवनीयाः, सत्यशोचहिंसादयः विशेषतो निर्दिष्टाश्च तत्र तत्र शास्त्रलोचनपूर्वकं तेषामेव ते विधेया येषां ते शास्त्रे सन्ति कर्त्तव्यतयोपदिष्टा इति अद्यत्वे तु नवे जगति नवनवशास्त्रोन्मेषनिपुणानूत्नव्यवहारप्रवर्तकाः केचन पण्डितम्मन्यास्तमिमं धर्मं विपरीतमेवाचरति उपदिशन्ति च। को नाम तत्र तत्र शास्त्रे वर्णाश्रमादिभेदतो विधिवेशेषतयोपदिष्टान् धर्म्मान् परित्यक्तधर्ममर्य्यादयको वैपरीत्येनाचरन् धर्मफलभाग् भवितुमर्हति। यतो हि विहितकर्मजन्यत्वं सामान्यतो धर्मस्य लक्षणम्। अतो हि शास्त्रविहितं परित्यज्यविहितेन यथायथेष्टं व्यवहरति सोऽधर्मः प्रसित एव स्यात् कुतोऽभ्युदयस्तस्य यतोऽभ्युदयनिःश्रेयसाधिगमः स धर्म इति व्यासचरणाः। एवञ्च संसारे मानवशरीरमासाद्यात्माभ्युदयार्त सम्यगालोच्य शास्त्रसारं पुंसा स एव किल धर्मः सेवनीयो यतोऽभ्युदय ऐहिकालौकिकपायलौकिकश्चान्ते निःश्रेयसाधिगमश्च सुखमाध्यं स्यादिति उक्तं हि भगवता नारायेण गीतायामर्जुनमुपदिशता–

श्रेयान् स्वधर्मो विगुणः परधर्मात् सुनिष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥[6]





एवं हि सति ये केचन शूद्रादयः परैर्वञ्चकैः परवित्तापहारिभिः प्रतार्य्यमाणा अद्यत्वे कलौ कलिसाम्राज्यो स्वधर्म विगुणधिया परित्यज्य ब्राह्मणादीनां परेषां वैपरीत्येन धर्ममाचरन्ति तैर्विपरीतमाचरद्भिर्धर्म्मफलं वोपार्जितमन्ते भवेदिति स्वयमेव विचारणीयं विचारदक्षैरिति यतो हि विहितकर्मजन्यो धर्म इत्यनुपदमेवोक्तम्। विहितत्त्वञ्च शास्त्र एव पर्यवसितं भवति इति शास्त्रलोचनपूर्वकं कृतं कर्माभीष्ठसिद्धिहेतुकं सुखैकसाधनं निःश्रेयसकरञ्चेति। सुनिश्चितम्। धर्ममार्गादेव दर्शनमार्गश्च प्रशस्तो भवति। यतो हि सैव शुद्धः मार्गः। भारतीय-दर्शने प्रधानरूपेण भेदद्वयमस्ति। आस्तिकदर्शनं नास्तिकदर्शनञ्चेति। तत्राऽऽस्तिका वेदानुयायिनः, नास्तिका वेदाननुयायिनः। उक्तञ्च—‘नास्तिको वेदनिन्दकः’ इति। आस्तिकदर्शनेषु साङ्ख्ययोग न्यायवैशेषिकपूर्वोत्तरमीमांसाः सन्ति। तत्रोत्तरमीमांसायाम्—वान्तरभेदेन पुनः दशविधानि दर्शनानि विद्यन्ते। तेषु दर्शनेषु विवर्तपरिणामवादयोरनुगामिनां बाहुल्यं दृश्यते। तयोरपि विवर्तवाद प्रतिपादकशङ्कराचार्याणामनुगामिनां बाहुल्यमिति निःसन्देहम्। तत्र वेदान्तदर्शनस्य बहवः भेदाः प्रत्यक्षीभवन्ति यथा– विशिष्टाद्वैतमतं रामानुजाचार्यस्य, द्वैतमतं श्रीमद्धाचार्यस्य, द्वैताद्वैतवादः श्रीनिम्बार्काचार्यस्य, शुद्धाद्वैतवादः श्रीबल्लभचार्यस्य, अचिन्त्यभेदाभेदवादः, चैतन्यमहाप्रभोः, अविभागाद्वैतवादः विज्ञानभिक्षोः, शैवविशिष्टाद्वैतवादः श्रीकण्ठाचार्यस्य, वीरशैवविशिष्टाद्वैतवादः श्रीपतेः। नास्तिकदर्शनेषु चार्वाकजैनबौद्धदर्शनानि सन्ति। जैनदर्शनेऽपि जैनज्ञानमीमांसा, जैनतत्त्वमीमांसा, जैनाचारमीमांसा इत्यादयः आन्तरिकाः भेदाः विद्यन्ते। तत्रैकस्मिन् बौद्धदर्शने माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकभेदेन चत्वारि मतानि सन्ति। इत्यमास्तिकदर्शनानि षट्, नास्तिकदर्शनानि च षट् इति प्रमुखरूपेण द्वादश दर्शनानि सन्ति। तेषु दर्शनेषु चार्वाकदर्शनं विहाय सर्वेषु जीवस्य पुनर्जन्मसिद्धान्तो मन्यते। तद्यथा अस्य लोकस्य तथैव परलोकस्यापि अस्तित्वं स्वीकृतं तैः।

यद्यपि स्वरूपे भेदोऽस्तीति। अस्य दर्शनस्यैव तान्त्रिकाः अपि भेदाः प्रसिद्धाः सन्ति। यथा वैष्णवतन्त्रम्, शैवशाक्ततन्त्रम्, शैवदर्शनम्, तेष्वपि पाशुपतसिद्धान्तः, कापालिकसिद्धान्तः, वीरशैवसिद्धान्तः, शैवसिद्धान्तः प्रत्यभिज्ञादर्शनम्, क्रमदर्शनम्, शाक्तदर्शनस्यापरं नाम कौलदर्शनमिति प्रसिद्धम्। तत्र पुनः श्रौतदर्शनम्, गीतादर्शनम् च। इतोऽपि स्वामिविकेकानन्दः अतः पर्यन्तं प्रोक्तवान् यत् सर्वेषां मानवानां पृथक्पृथक्दर्शनम् भवति। एवमेव तस्य दर्शनस्य कापि इयत्ता न निश्चिता। परन्तु ये प्रसिद्धाः तत्रैव तात्पर्यम्।

——

पादटिप्पणी

१. महाभारतम्

२. अनुशासनपर्वमहाभारतम् १११.३

३. महाभारतम् वनपर्व ३१३.११७

४. हितोपदेशः

५. मनुस्मृतिः

६. श्रीमद्भगवद्गीता ३/३५





सहायकग्रन्थाः

१. अनिर्वाणः, वेदमीमांसा १,२,३, संस्कृत कालेज, कोलकाता, २००१

२. बलदेव उपाध्यायः, भारतीयदर्शन, शारदामन्दिर, वाराणसी, २००१

३. बलदेव उपाध्यायः, भारतीय धर्म और दर्शन, चौखम्बा ओरियण्टालिया, २०००

४. प्रभाकर नारायण कटवेकर, वैदिकाख्यानम्, रा.सं.सं., नवदेहली, १९९५

५. डा. शशिबाला गौणः, दर्शनशास्त्रस्येतिहासः,चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१२

६. आर.एन.दाण्डेकरः, वैदिक विविलियोग्राफी फुल सेट १,२,३, बोरी पुने, २००९

७. मनोहरलालद्विवेदी, कात्यायन श्रौतयज्ञपद्धतिविमर्शः, रा.सं.सं, नवदेहली, २०१०

८. जोगिराजबसु, वेदपरिचयः, फार्म के. एल. उपाध्यायः, कोलकाता, १९७५

९. अन्नमभट्ट, तर्कसंग्रहः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २००४

१०. सुकुमारी भट्टाचार्या, वैदिक लिटरेचर १,२, भागः संस्कृत पुस्तक भण्डारः, कोलकाता, २००६

# कालिदासीयरघुवंशमहाकाव्ये वर्तमानप्रेक्षापटे नैतिकमूल्यबोधः

सुदीप्तकुमारकरणः

नवोन्मेषशालिनी बुद्धि प्रतिभा इति वचनप्रमाणयिता महाकविकालिदासः स्व गीतिकाव्ये तथा च दृश्यकाव्ये नवीनां दिशां सूचनां कृतवान्। तेषां ग्रन्थानामनुशीलनेन स्पष्टं लक्षितं भवति यत् तेषां काव्ये आध्यात्मिकताप्रेम विरहवेदना-गुरुगम्भीरभाव-मौलिकनीतिबोध-आदर्शचेतना-मूल्यबोधः-प्राकृतिकशोभा इत्यादीनाम् उपमादीनां माध्यमेन मानवहृदयाविच्छन्ने अकाशे ते स्थानं सिद्धं कृतवन्तः। प्रत्येकं काव्यसंस्कृतकाव्याकाशे वारिधारान्यायेन काव्यप्रतिभामाध्यमेन च काव्यमेघ इव प्रतिभाति। एवमपि प्रतीतिः भवति यत् प्रत्येकं व्यक्तेः पार्श्वे नित्यनवीनतां प्रसारयति तत् काव्यम्। पण्डितानां मते महाकवेः रचनाः इमाः सन्ति। यथा- १. रघुवंशम्, २. कुमारसम्भवम् इति महाकाव्यद्वयम्, ३. मेघदूतम्, ४. ऋतुसंहारेति गीतिकाव्यद्वयम्, ५. मालविकाग्निमित्रम्, ६. विक्रमोर्वशीयम्, ७. अभिज्ञानशकुन्तलमितिनाटकत्रयम्। एषु नाट्यगीतिमहाकाव्येषु क्वचित् क्वचित् नीतिनिर्देशनामपि प्रसङ्गः विवेचितः अस्ति।

महाकविरासीत् निरहंकारविद्यः तथा बुद्धिसूर्यः, प्रतिभावान् परमास्तिकः, पूर्णविश्वासी, शिवपार्वत्योः परमभक्तः नास्त्यत्र सन्देहलेशावकाशः। कवेः प्रत्येकं काव्यमध्ये आध्यात्मिकायाः छाया परिलक्षिता भवति, यथा रघुवंशमहाकाव्यस्य प्रारम्भे-

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥[१]

अत्र भगवन्तं विश्वनाथं परम्वरां चजनकजननीरूपेण परिकल्पनां





कृत्वा अर्धनारीश्वररूपेण ज्ञापनं करोति। माङ्गलिकपरिकल्पनामध्ये एव भारतीयजीवनयात्रायाः प्रारम्भो भवतीति ऐतिह्यम्-

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥[२]

अस्य साहित्यस्य जीवने प्रतिमुहूर्तमिव प्रयोग इति भारतीयसंस्कृतेरैतिह्यं तच्च कविः वारं वारं अदर्शि। अमङ्गलस्य विनाशं कृत्वा कल्याणस्य प्राप्तिरेव कवेरुद्देश्यम्। इदमेवोद्देश्यं आपामरजनसाधारणानां मध्ये नैतिकमूल्यबोधस्य जागरणं कृत्वा ज्ञापनमेव तात्पर्यम्। बृहत्तरं कल्याणमादर्शे संस्थाप्य काव्यनाटकेन ते स्वरूपं प्रदर्शितवन्तः। तेषां मते प्रेयसापेक्षया श्रेयसः वैशिष्ट्यमिति। तेषां मते श्रेयप्रेययौरैक्यमपि यथाकथञ्चिदक्षिगोचरी भवति। पूजनीयानामपमानेन कोऽपि आत्मकल्याणं न प्राप्नोति, अपमानकर्तुः सर्वतोभावेन विनाश एव इति निश्चप्रचनम्-

प्रतिवध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।[३]

यदि विश्वकविरवीन्द्रनाथमहोदयस्य भाषया वदामि चेत् तेषां मतमिदं यत् महाकविकालिदासः सौन्दर्योपभोगवैराग्यादीनां संयुक्तः कविः। कविरवीन्द्रनाथः वदति यत् तेषां काव्यानि भोगे एव न परिसमाप्यते अपि तु मोक्षपर्यन्तं तस्य सीमा। महाकविः रघुवंशमहाकाव्ये आदर्शराज्यस्य तथा आदर्शराज्ञां परिकल्पनां कृत्वा रघुवंशीयभूपतीनां जीवनमाध्यमेन कार्यप्रणाल्यदीनाञ्च माध्यमेन स्वरूपदानमपि चकार। तेषां वर्णनेन स्पष्टमिदं भवति यत् राज्यस्य विस्तारः, समाजस्योन्नतिकरणार्थं रघुवंशस्य राजानः स्वकीयं सर्वस्वमपि त्यागं कृतवन्तः। तेन सह तेषां मनसि कुण्ठाऽपि नासीत्। समष्टिनिमित्तं व्यष्टित्यागः न निन्दितो भवतीति तेषां मतम्। तदर्थमेव रघुराजः कलिगादीनि विजित्य-

श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्।[४]

ते राजानः महेन्द्रपर्वतस्योन्नतिशिखरमिवाधीश्वरं कलिङ्गराज इव धनरत्नं सम्मानं वा न स्वीकृतवन्तः।

नृपतयः नीतिशास्त्राबलम्बनेन जीवनं यपयन्ति स्म। देशस्य परिचाले मन्त्री, गुप्तचराणाञ्च महती आवश्यकता भवति। राजादिलीपस्य चरित्रचित्रणकाले महाकवेः लेखनी लिखति राजादिलीप अतीवगोपनीयतारूपेण राज्यं चालयति स्म, यदा कार्यसय समाप्ति भवति स्म तदा जनाः जनन्ति स्म। कवेः तात्पर्य यत् वर्तमानकालिकचलमाने जगति या राजनीति चलति सा न समीचीना यतो हि तत्र गोपनीयता अपेक्षते इति सन्देशः।

तथैव रघुवंशं महाकाव्ये पारिवारिकं मातापुत्रपित्रादीनां सम्पर्के मूल्यावबोधनं कारयितुमिच्छति। अपुत्रस्य पितुः कीदृशी अवस्था भवति इति कविः दिलीपराजानमधिकृत्य बोधयति। महाराजस्य दिलीपस्य राज्यसीमा आसमुद्रदारभ्य हिमालयपर्यन्त विस्तृतमासीत्। यद्यपि ते अगाधैश्वर्ययुक्तः, विशालपरिधियुक्तः, सर्वसुखयुक्तः, सन्नपि सन्तानाभावे खिन्नमनसैव स्यात्। सत्यमिदं यत् संसारे यदि मातापितरौ सन्तानहीनौ भूत्वा तिष्ठतः तदा तयोः जीवनं मरुभूमितुल्यं प्रथितं भवति। हृदयभङ्गो भवति परन्तु चक्षुर्भ्यां जलपातो न भवति। अतः धर्मशास्त्रनियमानुसारेण दत्तपुत्रं नेतुं बाध्यो भवतः। अस्मिन्नपि पक्षे महाकविः अतीवादम्यसाहसेन कार्यं कर्तुं प्रोत्साहयति। महाराजदिलीपः सुदक्षिणा च कुलगुरुवशिष्ठस्य तथा कामधेनोः परिसेवया पुत्ररत्नमप्राप्तवान्। तथर्तं ते ऐश्वर्यशालीभूत्वाऽपि तं त्यक्त्वा गुरोराज्ञया गोसेवानिमित्तं गां नीत्वा वने क्षेत्रे च चारितवन्तः। महर्षिनिर्देशानुसारेण पराक्रान्तसम्राट अपि राजप्रासादिभोगं त्यक्त्वा पर्णशालायाम्, कुशासनेशयनादिकं च कृतवन्तः। एवं प्रकारेण कष्टं कृत्वा स पुत्ररत्नं प्राप्तवान्। ततः परं नन्दिन्याः आशीर्वादानुसारेण राजादिलिपः पुत्रं प्राप्य तं निर्निमेषं पश्यन्नासीत्। एवं प्रकारेण पुत्रसुखं ते प्राप्तवन्तः। ततः परं एवं भूतं पुत्रं ते स्वाङ्के संस्थाप्य उरसि च धृत्वा पुत्रस्य स्पर्शेन ते अमृतसदृशं सुखं प्राप्तवन्तः। ततः परं ते निमीलितचक्षुषा बहुगणत्वविशिष्टं सुस्वादं कृतवान्। पितापुत्रयोः एवं प्रेम्णः स्वरूपमद्यापि





परिलक्षितो भवति। तथैव रघोः पुत्र अज अपि पित्रानुरूपमेवासीत्। तं वचनं कविः लिलेख। यथा–

प्रवर्तितो दीप इव प्रदीपात्।[५]

यथा एकः प्रदीपः प्रज्ज्वलति तदा तस्य पार्श्वे विद्यमानायां भूमौ यथा वैचित्र्यं न भवति तथैव पितापुत्रयोर्मध्येऽभेद आसीत्। समाजे एका कथा प्रचलिता अस्ति यत् यथा पिता तथा पुत्रः। एषा कथा प्राच्यार्वाचीनसर्वेषु कविषु दृष्टा भवति। यथा राजा अजस्य जीवने यथा पितृभक्तिः तथैव पत्नीप्रेम दृष्टं भवति। तथैव पुत्रं प्रति प्रितिरपि दृग्गोचरी भवति। एतत् सर्वमपि असाधारणमासीत्। तमपि महाकवि स्वलेखन्या लिलेख। यदा राजादशरथः अल्पवयस्कः तदा अजस्य पत्नी इन्दुमती दुःखिता जाता। सा इन्दुमती अतीववेदनायुक्ता पुत्रं दशरथं धृत्वा जीवनं यापनं कर्तुमिच्छति स्म। कवेः सुललितया वाण्या स्पष्टा भवति यत्–

तेनाष्टे परिगमिताः समाः कथञ्चित्।
बालत्वादवितथ सुनृतेनसूनोः॥[६]

गीताशास्त्रमपि वदति यत् निष्कामकर्मपूर्वकं आकांक्षारहितो भूत्वा अनासक्तमनसा स्वकर्मणि प्रवृत्तो भवतु इति निदेशः। महाकविरपि इमं सिद्धान्तं प्रतिष्ठापयितं चेष्टां कृतवान्। रघुवंशीयाः राजानः देशेविदेशे ख्याति लब्धा आसन्। तेषु के के गुणाः आसन् इति ज्ञातुं महाकवेरध्ययनमावश्यकम्।

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥[७]

तस्य तात्पर्यं भवति सञ्चयं त्यागाय। सत्यार्थं स्वल्पभाषणम्। यशसे विजयकामना। सन्तानार्थं दारपरिग्रहः। महाराजस्य दिलीपस्य चरित्राङ्कने कविः लिलेख यत्–

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्॥[८]

महाराजादिलीपः निर्भयभूत्वा स्वशरीरस्य रक्षां करोति स्म। रोगरहितो भूत्वा यजनं याजनं करोति स्म। निर्लोभी भूत्वा करग्रहणं करोति स्म। निराशक्तो भूत्वा राज्यसुखं भुङ्क्ते स्म। रघुवंशमहाकाव्ये राजा अतिथि इति नाम्नः राज्ञः चरित्रचित्रणेऽपि अनासक्तचित्तस्य कर्मणः प्राधान्यं परिलक्षितो भवति।

कोशेनाश्रयनीयत्वमिति तस्यार्थसंग्रहः।[९]

अर्थसञ्चये सति अन्यस्य साहाय्यं करणीयम्। तदर्थमेव ते धनसञ्चयं कुर्वन्ति स्म। रघुवंशमहाकाव्यस्य विषयवस्तुमाध्यमेन समाजोन्मतिसाधने एव प्रचेष्टा अपेक्षिता भवति। वर्तमानसमाजव्यवस्थायामपि अस्य वस्तुनः बहूपयोगो दृश्यते। तस्यास्वीकारस्य स्थानं नास्ति।

——





**तथ्यसूत्राणिः**

१. रघुवंशम्- १/१
२. महाभारतम् (मङ्गलाचरणश्लोक)
३. रघुवंशम्- १/७९
४. तत्रैव ४/४३
५. तत्रैव ५/३७
६. तत्रैव ८/९
७. तत्रैव १/७
८. तत्रैव १/२१
९. तत्रैव १७/६०

**सहायकग्रन्थपञ्जीः**


१. मल्लिक श्री रघुनाथ, कालिदास प्रतिभा, वाणी लाइब्रेरी, ५४/७, कालेज स्ट्रीट, कोलकाता- ७०००१२
२. दास ड. देवकुमार, रघुवंशम् (१), सदेश, १०१सि, विवेकानन्द रोड, कोलकाता- ७००००६
३. मिश्रः साहित्याचार्यः श्रीहरगोविन्दः, रघुवंशमहाकाव्यम्, चौखम्बा संस्कृत सीरिज अपिस, वाराणसी-१
४. वसु सुधांशु कुमार ओ कुण्डु तारक, कालिदास रचनासमग्र-अनुवाद, रिफ्लेकट पावलिकेशन, कोलकाता- ७००००९